अनुक्रमांक ——

विषय वेद:

नाम सम्वत्सरसत्रोल्लास (कृ॰ मे॰ सु॰ ...)

पत्र सं॰ —— १३-२२

श्लोक सं॰ ——

पंक्ति सं॰ (पृष्ठ) ४१

अक्षर सं॰ (पंक्ति) ११

आकार १०·१″ × ५·५″

लिपि दे॰ ना॰

आधार —— कागज

वि॰ विवरण अपूर्ण

001151

१ म॰ अ॰ प्रा॰ (२७५)

कृ॰ मा॰ सं॰ ...

Indira Gandhi National Centre for the Arts

Benares College

Indira Gandhi National
Centre for the Arts

श्रीगणेशाय नमः ॥ ॥यस्य निश्वसितं० महेश्वरं॥ सत्रं संवत्सरांतं यत्तच्चतुर्थे समीरितं। विशेषः पंचमे त
स्य वत्सराख्यस्य वर्ण्यते। तत्रादौ तावत्संवत्सरसत्रं विधत्ते। गावो वा एतत्सत्रमासताशृंगाः सतीः शृंगाणि नो
जायंता इति कामेन तासां दश मासा निषण्णा आसन्नथ शृंगाण्यजायंत ता उदतिष्ठन्नरात्स्मेत्यथ यासां ना
जायंत ताः संवत्सरमाप्त्वोदतिष्ठन्नरात्स्मेति यासां चाजायंत यासां च न ता उभयीरुदतिष्ठन्नरात्स्मेति गो
सत्रं वै संवत्सरो य एवं विद्वांसः संवत्सरमुपयंत्यृध्नुवंत्येवेति। यद्यपि गावस्तिर्यक्त्वात्कर्मानधिकारिणः
तथापि तदभिमानी देवता अत्राभेदेन विवक्षिता। अभिमंतव्यानां शृंगभावाभावौ तस्मिन्नारोप्य गोभिः सहता
दृशबुद्ध्या व्यवहरंति। पुरा शृंगरहिताः सत्यो गावः शृंगोत्पत्तिकामया एतत्संवत्सराय दीक्षिष्यमाणा दृत्वा
यनुवाकोक्तं सत्रमन्वतिष्ठन्। तासां शृंगकामोपेतानामनुष्ठाने प्रवृत्तानां यदा दश मासा निर्गता अभूवन्
अथ मासदशकादूर्ध्वं शृंगाण्युत्पन्नानि। तदानीं ता गावोऽपेक्षितेन फलेन समृद्धाः स्म इति मत्वा तस्मात्सत्रादु
त्थिताः। अथ तस्मिन्काले कासांचिद्गवां शृंगाणि नोत्पन्नानि। ताः पुनरपि मासद्वयमनुष्ठाय संवत्सरसंपूर्ति १
कृत्वा समृद्धाः स्म इत्येवं मत्वा तस्मात्सत्रादुत्थिताः। तदेवं यासां शृंगाण्युत्पन्नानि यासां च नोत्पन्नानि ता उभयवि

य्या अपि गावो एवं समृद्धाः स्म इत्येवं मत्वोत्थिताः। यत्रास्माद्गोभिरनुष्ठितं तस्माद्गोसत्रमित्येवायं संवत्सराख्यः
[illegible]शोऽभिधीयते। ये यजमाना एवं विद्वांसः संवत्सराख्यं कर्मविशेषमनुतिष्ठंति ते समृद्धिं प्राप्नुवंत्ये
व। [illegible]मर्थवादे। यासां गवां शृंगाण्यजायंत यासां च नाजायंत। ता उभय्योऽप्यृद्धिं गता इति। तत्र जातशृं
गाणां शृंगजन्मैवर्द्धिः इतरासां कथं सा समृद्धिरित्याशंक्य तां दर्शयति। तस्मात्तूपरा वार्षिकौ मासौ पर्त्वा चर
ति सत्राभिजितं ह्यस्या इति। यस्मादजातशृंगास्तूपराः सत्रेण समृद्धिं गताः तस्मादियं वर्षर्तुसंबंधिनौ मा
वा॰ सौ तूपरा प्राप्तिं प्राप्यारण्ये चरति। वार्षिकयोर्हि मासयोररण्ये संचरंतीनां दीर्घशृंगयुक्तानां गवां महान्क्ले
शो जायते। प्रबलवायुपेतया तीव्रया वृष्ट्याभिमुखे प्रतिहताः सत्यो मुखमर्वाग्भूमौ कृत्वा शृंगभारेण पीड्यंते।
तूपराणां तु नास्त्ययं क्लेशः। यथा केशश्मश्रुपूर्णशिरस्कानां पुरुषाणां सत्स्वपि सौंदर्याभिमानक्लेशेषु सुखेन दी
स्नानघृतभोजनादौ महान्क्लेशस्तद्वत्। यदेतदस्यै तूपराया गोर्दीर्घासुप्राप्तिसंपादनं तदेतत्सत्राभिजितं स
त्रानुष्ठानलब्धं। अथ प्रकारांतरेण सत्रानुष्ठानं प्रशंसति। तस्मात्संवत्सरसदो यत्किंच गृहे क्रियते तदाप्तमव
रुद्धमभिजितं क्रियत इति। यस्मात्सत्रं प्रशस्तं तस्मात्संवत्सरसदः संवत्सरसत्रमनुष्ठितवतो यजमानस्य गृ

Indira Gandhi National
Centre for the Arts

हे यत्किंच क्रियते। यत्किमप्यग्निहोत्रादिकं मंगविकलमप्यनुष्ठीयते तदा समंगसंपूर्णमेव भवति। तथा अ
वरुद्धमकाले कृतमपि स्वकाले कृतं भवति। अभिजितं फलापेक्षाराहित्येपि संपादितफलं भवति। अत एव
ग्रास्त्रान्यापाप्तिताः आहुः ते यां तेजो विशेषेण प्रत्यवायो न विद्यत इति। अथैतस्य सत्रस्य प्रायणीयोदय
नीयाह्वर्विशेषो विधत्ते। समुद्रं वा एते प्रप्लवंते ये संवत्सरमुपयंति यो वै समुद्रस्य पारं न पश्यति न वै स
तत उदेति संवत्सरो वै समुद्रस्तस्यैतत्पारं यदतिरात्रौ य एवं विद्वांसः संवत्सरमुपयंत्यनार्त्ता एवोदृचं
गच्छंतीति। ये यजमानाः संवत्सरसत्रमुपक्रमंते एते यजमानाः समुद्रमेव बाहुभ्यां तरितुमुद्युंजते। सत्र
स्य समुद्रवदतिभूतत्वात्। एवं सति यः पुरुषः समुद्रस्य पारं परतीरं न पश्यति स पुरुषः समुद्रादुद्गंतुं न श
क्नोति। अयं च संवत्सरस्तेन समुद्रेण समानः तस्मादस्य समाप्तिपरिज्ञानाभावे तत्र स्थातुमुत्साहो न भवे
न्नात्। तस्मात्कामाप्तिरूपमहर्विशेषं तेषां तस्य च समुद्रसमस्य संवत्सरस्य पारावारतीरभूतावतिरात्रौ एतदभि
ज्ञाय यजमानाः अनार्त्ता मनसमुद्वेगरहिताः एवोदृचमुत्तमां समाप्तिसंबंधिनीमुदयं गच्छंति। तस्मादतिरात्रा २.
वुध्यादेनुष्ठेयाविति भावः। यदि ब्रह्मसवाद्येनोवदं सतिरात्रः परमद्यनुवाक एव प्रायणीयोतिरात्रो विहितः त

र्युदयनीयातिरात्रेण सह निर्दिष्टमत्र पुनरुपन्यासः। तावेतावतिरात्रौ बहुधा प्रशंसति। इयं वै पूर्वोति
रात्रोसावुत्तरो मनः पूर्वो वागुत्तरः प्राणः पूर्वोपान उत्तरः प्ररोधनं पूर्वमुदयनमुत्तर इति। पूर्वः प्रायणी
योतिरात्रः प्राथम्यसाम्येन पृथिव्यादिरूपः। उदयनीयस्तु पश्चाद्भावित्वेन द्युलोकादिरूपः। प्ररोधनं
लौकिकस्य वैदिकस्य वा व्यापारस्य प्रारंभः। यावेतावतिरात्रौ सामान्येनोक्तौ तयोर्विशेषाकारेण स्वरूपं वि
धत्ते। ज्योतिष्टोमो वैश्वानरोतिरात्रो भवति ज्योतिरेव पुरस्ताद्धत्ते सुवर्गस्य लोकस्यानुख्यात्या इति। यो
यमतिरात्रः स ज्योतिष्टोमरूपः स च वैश्वानरदृष्टः। तदनुष्ठानेन स्वर्गमार्गे पुरस्ताज्ज्योतिर्दधतेति तच्च
स्वर्गप्रकाशनाय भवति। यदुक्तं सूत्रकारेण। प्रायणीयमतिरात्रमुपेत्य चतुर्विंशमुक्थ्यमारंभणीय
मुपयंतीति। तदिदं विधत्ते। चतुर्विंशः प्रायणीयो भवति चतुर्विंशतिरर्धमासाः संवत्सरः प्रयंत एव सं
वत्सरे प्रतितिष्ठंतीति। तस्य त्रीणि च शतानि षष्टिश्च स्तोत्रीयास्तावतीः संवत्सरस्य रात्रयः उभे एव संवत्सरस्य
रूपे आप्नुवंतीति। यदेतदारंभणीयमहस्तदेतत्पूर्वोक्तादतिरात्रादुत्तरभावित्वेपि वक्ष्यमाणेभ्योभिप्लवष
डहवृत्तिरूपेभ्यो मासेभ्यः प्रथमभावित्वात्प्रायणीयमित्युच्यते। स चाहर्विशेषश्चतुर्विंशस्तोमयुक्तः कार्यः।

Indira Gandhi National
Centre for the Arts

२ तथा सति संख्यासाम्याद् अर्धमासद्वारा संवत्सरः संपद्यते। तत्संपत्तौ सत्यां आरभमाणा एव यजमानाः सं
वत्सरसत्रानुष्ठाने स्थिरा भवंतीति। किं चैतस्या ऋचः कश्यप ऋषित्वाद् कश्यपस्य च पंचदशस्तोत्रयुक्तत्वाद् एकै
कस्मिन् स्तोत्रे चतुर्विंशतिसंख्याकास्तृचस्तोत्रियासु सतीषु मिलित्वा षष्ट्युत्तरशतात्रय परिमि
तास्तोत्रीया भवंति। एवं सति संवत्सरस्य यदिदं चतुर्विंशत्यर्धमासात्मकं रूपं यच्च षष्ट्युत्तरशतात्रय
रात्र्यात्मकं रूपं तेऽत्रोभे अपि रूपे संख्यासाम्येन प्राप्नुवंति। अनंतरभावी व्यहानि विधत्ते। ते सं स्थिसा
अतिरात्रात्तरैरहोभिरुत्तिष्ठंतीति। अनुष्ठितप्रायणीयारंभणीयास्ते यजमानास्तत ऊर्ध्वं संस्थितस्य अ
तिरात्रे सत्रसमाप्तेरर्वाग्ज्योतिर्गौरायुरित्यादिभिरहोभिरनुतिष्ठेयुः। अत्र यानि पूर्वं प्रपाठके
विहितानि तेषां तु तत्र अर्थेनुवादः। यानि त्वविहितानि तेषामत्र स विधिरिति विवेकः। ज्योतिरादीनामभिप्ल
वषडहतां विधत्ते। षडहा भवंति षड्वा ऋतवः संवत्सर ऋतुष्वेव संवत्सरे प्रतितिष्ठंतीति। ज्योतिर्गौरा २
युरायुर्गौर्ज्योतिरित्येवं षडहत्वं। उक्तेषु षडहेषु मध्यवर्त्यहर्द्वयं प्रशंसति। गौश्चायुश्च मध्यतः सोमौ भ
वतः संवत्सरस्यैव तन्मिथुनं मध्यतो दधति प्रजननायेति। योयं गोष्टोमः यश्चायुष्टोमः तावुभौ ष

डहस्य मध्ये कर्तव्यौ। तत्तेन संवत्सरसत्रस्य मध्ये मिथुनं संपादयंति। तच्च प्रजननाय भवति। षडह
स्याद्यंतावहर्विशेषौ प्रशंसति। ज्योतिरभितो भवति विमोचनमेव तच्छंदसामेव तद्विमोकं यंत्यथो उ
भयतो ज्योतिषैव षडहेन सुवर्गं लोकं यंतीति। षडहस्याद्यंतयोर्ज्योतिष्टोमः कार्यः। तदेतदादौ ज्योतिष्टो
ममनुष्ठायपुनरप्यंते ज्योतिष्टोमस्यानुष्ठानं। उपक्रमेनिरूढस्य विमोचनसमानं भवति। तेन ज्योति
५ गौरायुरित्येतत्त्रयरूपाणि छंदांसि गायत्र्यादीन्येव विमोकं प्राप्नुवंति। अपि च पार्श्वद्वये ज्योतिर्युक्तेन द्वि
पक्षसमानेन षडहेन प्रकाशितं स्वर्गं सुखेन प्राप्नुवंति। अथ पक्षाभ्यां ज्योतिरादिकं प्रशंसति।
ब्रह्मवादिनो वदंत्यासते केन यंतीति देवयानेन पथेति ब्रूयाच्छंदांसि वै देवयानः पंथा गायत्री त्रिष्टु
ब्जगती ज्योतिर्वै गायत्री गौस्त्रिष्टुगायुर्जगती यदेते स्तोमा भवंति देवयानेनैव तत्पथा यंतीति।
ये यजमाना आसते सत्रमनुतिष्ठंति ते यजमानाः केन पथा स्वर्गं गच्छंतीति। ब्रह्मवादिनां प्रश्नः। तत्राभि
तो देवयानेन पथा गच्छंतीत्युत्तरं ब्रूयात्। येन देवा यांति सोयं देवयानः पंथाः। सोपि कीदृश इति चेत्
श्रूयतां। गायत्र्यादीनि छंदांस्येव मार्गसाधनत्वाद्देवयानः पंथा इत्युच्यंते। इह तु ज्योतिष्टोमादीन्येव

गायत्राणि। तस्मादेतेषामनुष्ठानेन प्रयाग छति। अत्र सर्वेषहः सु पृष्ठस्तोत्रे सामैक्यं विधत्ते। स
मान सामभवति देवलोको वै साम देवलोकादेव न यंतीति॥ बृहद्रथंतरमेव वा सर्वेषहः स्वेत्रेन व
साम पृष्ठस्तोत्रे गायेत्। देवलोको हि पक्षपातरहितेन सर्वसमत्वात्सामरूपः। अत एकविधेन सा
म्ना कदाचिदपि देवलोकान्न निर्गच्छंति। तस्य साम्न आधारभूता नाम चामते षहः सु भेदं विधत्ते। अन्या अ
न्याः। नो भवंति मनुष्यलोको वा ऋचो मनुष्यलोकादेवान्यमन्यं देवलोकमभ्यारोहंतो यंतीति। ऋचो
हि मनुष्यलोकस्वरूपाः साम्न आधारभूतत्वात्। यथा कर्मानुष्ठान द्वारा देवलोकस्याधारभूतो मनुष्य
लोकस्तद्वत्। अन्यमन्यमिति पंचम्यर्थे द्वितीया। ऋचामन्यत्वे सत्यस्मादन्यस्मान्मनुष्यलो
कात् देवलोकमभ्यारोहंतो यजमानाः सुखं प्राप्नुवंति। नानाविधकर्माधारत्वान्मनुष्यलोकस्य नानाविधत्वं य
का देवलोकमभ्यारोहंतो यजमानाः सुखं प्राप्नुवंति ... कर्मवैचित्र्येण फलवैचित्र्यमित्यर्थः। प्राकृतं साम बाधितुं सामांतरं विधत्ते। अभि ४
द्वा अन्यमन्यं देवलोकं कर्मवैचित्र्येण फलवैचित्र्यमित्यर्थः ... अभिवर्त्त नामकं कार्यं।
वर्तो ब्रह्मसामं भवति सुवर्गस्य लोकस्याभिवृत्या इति। ब्रह्मणः संबंधि यत्साम तदभिवर्त्त नामकं कार्यं।
तस्य स्वर्गलोकस्याभितः प्राप्त्यै भवति। अहरंतरं विधत्ते। अभिजिद्भवति सुवर्गस्य लोकस्याभिजित्या इति।

इति मुख्यत्वं तामनातिदिशेदत॥ ... प्रायणीय इति ... अन्यानि नातिदेश इति
चेदामैवं। प्रायणीय शब्द ... तस्य प्राथम्य ...

विषुवत्यायत्प्रथममहस्तस्मात्पूर्वं स्वरसामाख्यास्त्रयो ये अहर्विशेषाः तेभ्यो पि पूर्वमभिजिदाख्यमेकमहः
कर्तव्यं तच्च स्वर्गाभि जयाय भवति। पुनरप्यन्यदहर्विधत्ते। विश्वजिद्भवति विश्वस्य जित्या इति। विषुवत
दन्ह ऊर्ध्वभाविनो ये त्रयः स्वरसामानो हर्विशेषास्तेभ्य ऊर्ध्वं विश्वजिदाख्यमहः कर्तव्यं तच्च विश्वस्य
जयाय भवति। प्रतिमासममि पूर्वषडहेभ्य ऊर्ध्वं पृष्ठ्यं षडहं अतिग्राह्यानियमं च विधत्ते। मासि मासि पृष्ठा
न्युपयंति मासि मास्यतिग्राह्या गृह्यंते मासि मास्येव वीर्यं दधति मासां प्रतिष्ठित्या इति। प्रतिमासानुष्ठा
नेन तस्मिंस्तस्मिन्मासि वीर्यं संपद्यते। पृष्ठ्यस्य षडहस्य मासेषूर्ध्वभागं स्थानत्वेन विधत्ते। उपरिष्टान्मासां
पृष्ठान्युपयंति तस्मादुपरिष्टादोषधयः फलं गृह्णंतीति॥ ॥अत्र मीमांसा॥ सप्तमाध्यायस्य तृतीय
अ.२. पादे चिंतितं॥ गवामयन आद्ये प्रायणीयेति नामपदः तद्वादशाहिकादह्नो धर्मानतिदिशेत्कृता ...
वैन्या यनातिदेशो मैवं प्रथमतादृशोः। अह्नोस्तुल्यैव द्वयोस्तुल्यत्वेन उभयत्र मुख्यत्वे प्रयने कार्यत्व
संगाभावात् प्राथम्यापत्ति गच्छति प्रवर्तते कर्मानेनेति प्रायणीयं। अतो नैतन्नाम धर्मानतिदिशति। तत्रैव
अ.3 चतुर्थपादे चिंतितं गवामयने ज्योतिरादौ किं द्वादशाहिकी ऐकाहिकी वानुमा कादा धौ ...

पमात्। गवामयने ज्योतिर्गौरायुरिति ज्योतिरादिनामकास्त्र्यहो वा गा विहिताः। तेषु द्वादशाहिकातिदेश
ष्प ता सुक्ता कुतः अनुमितवाक्येन तत्सापमात्। गवामयनं हि द्वादशाहविकृतिरिति स्थितिः। अत एव सं
बाधित्लिंगत्वतदाद्यधर्मप्राप्तः ओदकोऽनुमीयत इति प्राप्ते ब्रूमः। संति ज्योतिरादिनामकास्त्र्यहा एकाहाः
तदाद्यधर्माः गवामयनिकेषु ज्योतिरादिषु ज्योतिरादिभिन्नास्त्वा भस्ति निर्नामभिः प्राप्ताः। नाम चानु
मानिकाच्चोदकात्प्रबलं। प्रत्यक्षश्रुतत्वात्। अतश्चोदकस्य बाधितत्वादेवैकाहिकातिकर्तव्यताप्राप्ता॥
॥ ॥इति यजुःसंहितायां सप्तमकांडे पंचमप्रपाठके प्रथमोऽनुवाकः॥ प्रथमानुवाकेन गवामयननाम
कं संवत्सरसत्रं केचिद्विशेषैः सह विहितं। सोमयागा द्विविधाः। आहुता अनाहुताश्चेति तेष्वाहुता एका
हाः। आहुता अपि द्विविधाः। अहीनाः सत्ररूपाश्च। द्विरात्रमारभ्यैकादशरात्रपर्यंता अहीनाः। एका
दशरात्रद्वादशरात्रावुभयविधौ। अहीनत्वे सत्ररूपौ च। त्रयोदशरात्रमारभ्योपरितनानि सत्राण्येव। तान्य ५
पि द्विविधानि। रात्रिसत्राण्ययनात्मकसत्राणि चेति। शतरात्रपर्यंतानि रात्रिसत्राणि। संवत्सरसत्रमा
र्भ्योपरितनान्ययनसत्राणि। तेषां च सर्वेषां प्रकृतिभूतमिदं गवामयनं। तस्य च संवत्सरकालसाध्यः प्रका

गः पूर्वानुवाके विहितः। अथ द्वितीये दशमाससाध्येन प्रयोगेण सह विकल्पो विधीयते। तमेतं विधातुं
पूर्वोक्तमेवार्थवादं कंचिद्विशेषं विवक्षया पुनः पठति। गावो वा एतत्सत्रमासताशृंगाः सतीः शृंगा
ण्यसिषासन्तीः तासां दशमासा निषण्णा आसन्नथ शृंगाण्यजायन्त ता अब्रुवन्नरात्स्मोत्तिष्ठामावत
काममरुत्स्महि येन कामेन न्यषदामेति। पुरा शृंगरहिताः सत्यो गावः शृंगाणि सिषासंतीः सनितुं लब्धु
मिच्छंत्यः एतदुच्यमानं सत्रमन्वतिष्ठन्। तासां गवां दशमासा अनुष्ठिता अभवन्। अथास्मिन्काले शृंगा
ण्युत्पन्नानि। ताश्चोत्पन्नशृंगाः परस्परमिदमब्रुवन्। येन शृंगविषयेण कामेन न्यषदाम तत्रानुष्ठाना
र्थं वयमेतत्स्थाने निषण्णाः तं शृंगविषयं काममवरुत्स्महि। इत्थं संपादितवत्यः। एवमुक्त्वा काश्चिद्गावः उत्ता
स्थुः सत्रादुत्थिताः। ता उदतिष्ठन्निति पूर्वोक्तश्रुत्यर्थवादे श्रवणात्। तत्रैव यदन्यदुक्तं। अथ यासां नाजाय
न्त ताः संवत्सरमाप्त्वोदतिष्ठन्निति। तत्र विवरणं क्रियते। तासामुत्ता अब्रुवन्नर्धा वा याववतीर्वा
अरात्स्म द्वादशौ मासौ संवत्सरं संपाद्योत्तिष्ठामेति। तासां द्वादशे मासि शृंगाणि प्रावर्तन्त श्र
वी द्धया [illegible] मासा [illegible] अवश्यावतन। आर्धं [illegible] शृंगाण्यसन् [illegible] ऊर्जमेवासां धत्ते [illegible]

५ गावः सत्रमनुतिष्ठंति। तासामनुतिष्ठंतीनां मध्ये जातशृंगाः सूयमानाः स्ववशिष्टाः अर्धा वा क
श्चिद्दशमासः परस्परमेवमब्रुवन्। एतास्वर्धमासु गोषु मध्ये विद्यमानत्र का श्चिछृंगकामाः अ
परास्तु किमेभिः शृंगैः कर्मणोदरपूरणमासं संपादयाम इति मन्यंते। एवं सति शृंगकामा अ
शृंगकामाश्च यावतीर्वा पयस्यः संति ताः सर्वा आमिलित्वा परस्परमेवमब्रुवन्। किमब्रुवन्निति
तदुच्यते। इमौ संवत्सरावशिष्टौ द्वादशसंख्यापूरणौ मासावासामहा एव सर्वदाप्यनुतिष्ठा
म। ततः संवत्सरं पूरयित्वा पश्चादुत्तिष्ठामेति। तासां संवत्सरं पूरयंतीनां गवां मध्ये यासां शृंगाश्र
द्धासीत् तासां तथैव श्रद्धया द्वादशे मासि शृंगाण्युत्पन्नानि। यासां तु श्रद्धा नास्ति ता अश्रद्धये वमाः
संपन्ना असंपन्नशृंगाः यालोके तूपराः शृंगरहिता दृश्यंते। एवं सति या गावः शृंगाण्युपलभंते।
या श्चान्या अतूपराः शृंगरहिताः ता अपेक्षितामूर्जमेवालभंत। ता उभयविधा अपि स्वस्वप्रयोजन सि ६
ध्या समृद्धिं गताः। अतो दशमासानुष्ठानेन शृंगमात्रं। द्वादशमासानुष्ठानेन रमणीय शृंगत्वं ऊ
र्जभूयस्त्वात्फलभूयस्त्वमेतिन्यायात्। तदेवमर्थवादेन दशमासानुष्ठानं द्वादशमासानुष्ठानं च प्रश

स्य विकल्पितं पक्षद्वयं विधत्ते। ऋध्नोति दशसु मासूत्तिष्ठन्नृध्नोति द्वादशसु य एवं वेदेति। यो यजमानः
प्रकारद्वयं वेत्ति सोयं स्वेच्छया न्यतरप्रकारमनुतिष्ठन्समृद्धिं प्राप्नोति। ननु द्वादशसु मासेषु संपूर्णानुष्ठा
फ नलाभ्दत्फलं। दशमासपक्षे तु कथमिति स्वाशंक्योपपादयति। पदेन खलु वा एते यंति विंदति खलु वै पदेन
यंति। एते दशमासानुष्ठायिनो यजमानाः कालाल्पत्वेपि पदेन खलु वै यंति। न्यास्त्येण मार्गेणानुतिष्ठं
ति। लोकेपि पदेन यन्राजमार्गेण गच्छन्पुरुषः स्वल्पस्खलनेपि ग्राममप्राप्तिं लभत एव। तद्वदत्रापि फलप्रा
प्तिर्युक्ता। उपपादितं पक्षद्वयमुपसंहरति। तद्वा एतदृद्धमयनं तस्मादेतद्गोसनीति। यदेतद्गवामयनं तद्य
दि दशसु मासेषु समाप्यते यदि वा द्वादशसु सर्वथाप्यृद्धफलप्रदमेव। यस्मादयनस्य महिमा भूयान्। तस्मा
देतदयनं गोसनि गवां तिर्यक्सनिं आदीनामप्यभिमतलाभहेतुः। किंतु वक्ष्यमाणविशिष्टगुणा सा गोसनिः
यः॥ ॥इति द्वितीयोनुवाकः॥ ॥द्वितीये दशमासद्वादशमासविकल्पोभिहितः। अथ तृतीये द्वादशः षड
हविषयो विकल्पो विधीयते। यत्पूर्वं विहितं मासि मासि पृष्ठ्यान्युपयंतीति तत्र पक्षांतरं विधत्ते। प्रथमे
मासि पृष्ठ्यान्युपयंति मध्यम उपयंत्युत्तम उपयंतीति। सर्वेषु मासेषु पृष्ठ्यषडहो नानुष्ठेयः। किंतु प्र

Indira Gandhi National
Centre for the Arts

थमस्य मध्यमो तमे भुक्तिशेषमासे ऽस्मिन्नयमेकः पक्षः। पुनरपि पक्षान्तरं विपत्ते। तदा दुर्यां वे त्रिरेकस्यां रु
उपसीदंतितदकं वै सापराभ्यां दोहाभ्यां दुहे यकुतः साधोक्ष्यते यां द्वादशाहत्वुपसीदंतीति संवत्सर
ऽसंपाद्यैतमेनस्तिस्तत्सत्त्वानुपेयुः तदा यजमानाय तत्पश्चन्न वरुंधत इति। लोके दोग्धारः पुरुषा एकस्या
ऽन्तेमध्येयां गां दोग्धुं त्रिवारं प्राप्नुवंति सा गौः प्रथमपर्याये प्रभूतं क्षीरं प्रयच्छति। अपराभ्यां द्वितीयतृती
यदोहनपर्यायाभ्यां दद्रूवै दुहे। अल्पमेव क्षीरं दोग्धि। एवं सति यां गामेकस्मिं दिने द्वादशकाले त्वां दोग्धु
प्रपद्यंति सा गौः कुतो धोक्ष्यते। न हि क्षीराभावे दोहनमुचितं। तस्माद्धोमानस्य षट्त्रिंशदहस्याभिमासत्रया
नुष्ठानमनुचितं। किमु वक्तव्यं द्वादशमासानुष्ठानेऽप्यनुचितमिसेवां तदा कुत्र तस्मिन् पक्षे षडह विच्छे
भिन्नाः कल्पयंति। तस्मात् संवत्सरमनुष्ठायां तेमासि सत्त्वे देऽष्टक्षाः षडहे नुष्ठेयाः। इतरेषु तु मासेषु पंचमेनाः
भिन्नं षडहेनैव मासस्तत्कल्प्यां तथा सति यजमानाः षट्त्रिंशदहस्य सत्त्वात्वाद्वत्संस्तरणं प्राप्नुवंति। प
एवं विहितस्य मानं स्नानमभवतीति तदेतद्वात्रविशेषकारेण विपत्ते। समुद्रं वा एते न वारपारं प्रप्लवंते
ये संवत्सरमुपयंति यद्बृहद्रथंतरे अन्वर्जेयुर्यथामध्ये समुद्रस्य प्लवमन्वर्जेयुस्तादृक्तदनुसर्जीरन् ७

द्रथंतराभ्यामिल्लायांतेऽग्नंतीति सर्वेभ्यो वै कामेभ्यः संधिर्दुहे तद्यजमानाः सर्वान् कामानवरुंधत इति। पा
रावारे पारावरीचीतीरेऽपि यजमानाः संवत्सरसत्रमनुतिष्ठंति एते तीरद्वयरहितं समुद्रं बाहुभ्यां तरितुमित्तितित
त्वाशक्यं। यदि तत्र बृहद्रथंतरे साम्नी अनुक्रमेण ऽष्टौ स्तोत्रे संपादयेयुस्तदानीं यथा समुद्रस्य मध्ये
तरणसाधनं प्लवं संपादयेयुस्तादृक् तद्भवति। तस्मादनुत्सर्गं कदाचिदप्यपरित्यज्य बृहद्रथंतराभ्या
मिलास्तोत्रं प्राप्य प्राति पांयत्रसमाप्तिंगच्छंति। अन्यदीयेनापि वत्सेन दोग्धुं शक्या गौः संधिरित्युच्यते।
मा च संधिः सर्वेभ्यः कामेभ्यो दुहे। यथा यथा क्षीरमपेक्षितं तथा तथा पयं केचिद् समादाय दोग्धुं शक्यते
तां गच्छंति अत्रापि यजमानाः अन्यदीयाभ्यां प्रकृतिगताभ्यां बृहद्रथंतराभ्यां तत्तद्दिनेषु युज्यमाना
भ्यां सर्वान् कामान् प्राप्नुवंति॥ ॥तृतीयोऽनुवाकः॥ ॥तृतीये षट्त्रिंशदहविषयप्रकारविशेषोऽभिहितः। अ
थ चतुर्थे उत्तरे पक्षस्य प्रकारविशेषोऽभिधीयते। द्वौ हि संवत्सरसत्रस्य पक्षासी। एतच्चान्यत्र समाम्नातं। यथा
साला वै पक्षासी एवं संवत्सरस्य पक्षासादृति। तत्र प्रथमः षण्मासात्मकः पूर्वस्मिन् पक्षे समस्तमेवमैकरूप्य चा
नानात्वं अभिहितं इदानीं द्वितीय षण्मासात्मके उत्तरस्मिन् पक्षे स्तिस्त विपरीतेन रूपेण स्थंसामनाना

Indira Gandhi National
Centre for the Arts

त्वं चाभिधीयते। तत्रादावेकैकं विधत्ते। समान्यत्र चो भवंति मनुष्यलोको वा ऽत्र चो मनुष्यलोकप्र
त्यवरोहंतो यंतीति। मनुष्यलोके हि कर्म कृत्वा पश्चाद्देवलोकं प्राप्नुवंति। एवमाधारमेतां च मध्यमस्य पश्चा
त्स्यां साम गायंति। तस्मादृचो मनुष्यलोकस्वरूपाः। ताश्च समान्य एकरूपाः कर्तव्याः। एकस्मिन्नहनि या
स्तवस्ता एवास्मिन्नप्युक्थ्याः। एवं सत्यृगात्मका मनुष्यलोकात्कदाचिदपि नागच्छंति। अपस्यादिसंत
नाविच्छेदात्। अथ सामनानात्वं विधत्ते। अन्यदन्यत्साम भवति देवलोको वै साम देवलोकादेवान्यमन्यं म
नुष्यलोकं प्रत्यवरोहंतो यंतीति। साम्नः पश्चाद्भावित्वसाम्येन देवलोकत्वं। तादृशां च साम्नां सर्वस्मिन्दिने यद्भ
वति ततोऽन्यदुत्तरस्मिन्नहनि कर्तव्यं। लोकेऽपि देवलोकान्निर्गच्छंतः पुरुषा अन्यमन्यं मनुष्यलोकप्रदेशं ग
च्छंति। यद्वा अन्यमिति पंचम्यर्थे द्वितीया। अन्यस्माद्देवलोकात्कर्मफलानां तारतम्योपेतत्वेन द्विविधत्वात्तदा फ
विलक्षणाद्देवलोकात्प्रत्यवरोहंतो यजमाना मनुष्यलोकं प्राप्नुवंतीत्यर्थः। विशेषांतरं विधत्ते। जगतीमग्र
उपयंति जगती वै छंदसां प्रत्यवरोहंतीति। सर्वस्मिन्नप्यक्षसि गायत्री प्रथममनुष्ठिता। उत्तरस्मिंस्तु ज
गतीं प्रथममनुष्ठेया। तस्मात्सति जगतीप्रत्यन्यानि सर्वाणि छंदांस्यवरोहं प्राप्तानि भवंति। पुनरावरो



त्रयं क्रमेण विधत्ते। आग्रयणाद्ग्रहादुक्थ्यानि त्रयमस्मिंस्त्रि ऽग्निष्टोमात्स ज्यायान्युक्थ्यं कनीयान्
प्रत्यवरोहतीति। यथा गायत्र्यादिछंदःसु पूर्वस्मात्पक्षसो विपर्ययेणोत्तरपक्षसोऽनुष्ठानं। एवं ग्र
हसोमस्तोमेष्वपि द्रष्टव्यं। तत्राग्रयणोऽन्ते गृहीतः द्वहत्वादौ। तथा सति ग्रहाः प्रत्यवरूढा भवंति। तथा
ततः रथंतरं पृष्ठं पूर्वदिनेऽनुष्ठितं। द्वहतुत्तरस्मिन्पृष्ठं पूर्वमनुष्ठेयं। तथा सति सर्वाणि पृष्ठस्तोत्राणि प्र
त्यवरूढानि भवंति। तथा तत्र यज्ञायज्ञियस्तोमोऽन्तेऽनुष्ठितः द्वहतु आदावनुष्ठेयः। तथा सति सर्वे स्तो
माः प्रत्यवरूढा भवंति। यस्मादत्र प्रौढस्य यज्ञायज्ञियस्य प्रथमभावी। अर्वाचि स्तोत्राणि वैरूप्यादयः पश्चाद्भा
विनः। तस्माल्लोकेऽपि ज्यायांसं पितरं पितामहं वा प्रति कनीयान्पुत्रः पौत्रो वा वाहनादश्वादेरवरोहति। अ
थातिग्राह्यान्विधत्ते। वैश्वकर्मणो गृह्णाति विश्वान्येव तेन कर्माणि यजमाना अवरुंधत आदित्यं गृ
ह्णातीयं वा अदितिरस्यामेव प्रतितिष्ठतीति। वाचस्पतिं विश्वकर्माणमित्यनेन गृह्यमाणोऽतिग्राह्यो
वैश्वकर्मणः तेनातिग्राह्येण सर्वाण्यपि कर्माणि यजमानाः प्राप्नुवंति। महीमूषु मातरमित्यनेन गृह्यमा
णोऽतिग्राह्य आदित्यः। भूमेरदितित्वात्तेनातिग्राह्येण भूमौ प्रतितिष्ठंति। अत्र सूत्रकारः वैश्वकर्मणम

Indira Gandhi National
Centre for the Arts

ति श्राद्धानामष्टसंख्याकानि वाचस्पतिं विश्वकर्माणमूतय इति श्लो मूतआदित्यं महीमूषु मातरमि
ति श्राद्धाणामष्टसंख्याति वाचस्पतिं विश्वकर्माण मूतय इति श्लोक आदित्यं महीमूषु मातरमि
तिताभ्येवमेव व्याख्यासंख्या सामहाव्रतादिति। तस्मिं मध्यस्यासं विधत्ते। अन्योन्योन्यस्य मिथुन
त्वाय प्रजात्यादिति। अन्योन्यस्य एवैकस्मिं दिनैवैश्वकर्मणो गृह्यते। ततः परेद्युरादित्यः। तताभि
परेद्युर्वैश्वकर्मणः। पुनरपि परेद्युरादित्यः। एवं सति द्विलेन मिथुन कृत्वा तजोत्पत्तये संपद्यते। अ
थ द्वादशाहार्यंदशरात्रं विधत्ते। अवांतरं वेदशरात्रेण प्रजापतिः प्रजा असृजत यद्दशरात्रो भवति
प्रजाएव तद्यजमानाः सृजेत एता ह वा उदंकः शौल्वायनः सत्रस्यर्द्धिमुवाच यद्दशरात्रो यद्दशरा
त्रो भवति सत्रस्यर्ध्या अथो यदेव पूर्वेष्वहःसु विलोम क्रियते तस्यैवैषा शांतिरिति। एतच्च वाक्यं दशरा
त्रे दर्शितस्य व्याख्यातं॥ ॥इति चतुर्थोनुवाकः॥ ॥चतुर्थेनुवाके उत्तरपक्षस्थिति विशेषो भिहि
तः। अथ पंचमेनानुवाके प्रसक्तयोर्द्वयोर्वा मन्त्रयोर्विशेषोभिधीयते। तस्मिं विधत्ते। यदि सोमौ ९
संसुतौ स्यातां महति रात्रिये प्रातरनुवाकमुपाकुर्यात्पूर्वो वाचं पूर्वो देवताः पूर्वश्छंदांसि वृंक्तेइति।
यदि कदाचित् यजमानद्वयोः परस्परमात्सर्येण गवामयनगतौ सोमौ संभूयाभिषुतौ स्यातां।

तदानीं महारात्रे बुध्वा प्रातरनुवाकनामकस्य शास्त्रस्योपाकरणं कुर्यात्। प्रातर्यावभ्यो देवेभ्य इत्या
दिमंत्रेषु स्वर्यं प्रोदस्य यः। यो यजमानसंघः पूर्वमेव उत्तः सन्नुपाकरोति सः अन्यस्य सपत्नस्य वा
दिमंत्रेषु स्वर्ध्यः। वृषण्वतीं प्रतिपदं कुर्यात् प्रातः सवनादेवैषा
गादा इन्द्रं वृंक्ते आदत्ते। तस्मिंश्च प्रातरनुवाके त्र्यग्निवृषोषं विधत्ते। वृषण्वतीं प्रतिपदं कुर्यात्प्रातः सवनादेवैषा
मिंद्रं वृंक्ते योदिति। प्रहृतो आपो रेवतीः क्षयथा हि वस्व इत्येषा प्रथमा दृश्यतां परेलज्य वृषन्वत्या दुवती
मिंद्रं वृंक्ते योदिति। प्रहृतो आपो रेवतीः क्षयथा हि वस्व इत्येषा यजमानानां देवतारूपमिंद्रं प्रातः सवनादपनयति य
अन्यान्मध्ये प्रथमां कुर्यात्। तथा सति स एवान्येषां यजमानानां देवतारूपमिंद्रं प्रातः सवनादपनयति य
स्मांतरमाह। अथो खल्वाहुः सवनमुखे सवनमुखे कार्येति सवनमुखात्सवनमुखादेवैषामिंद्रं वृंक्ते इ
ति। त्र वाणामपि सवनानां प्रारंभे सैव वृषण्वती पठनीयेत्येवं केचिदाहुः। तथा सति परेषां सर्वसवनारं
माद्दिंद्रमपसारयति। अथ तत्राभि भूतिहोममंत्रान्पंचपठति। संवेशायोपवेशाय गायत्रियाः स्त्रिष्टु
भोजगत्या अनुष्टुभः पंक्त्या अभिभूत्यै स्वाहेति। संवेशायगायत्र्यादीनां छंदसां स्वकार्यवर्द्धेः सम्यकू
प्रवेशाय। उपवेशाय प्रविष्टानां चान्तस्थिरावस्थितये। गायत्र्या अभिभूत्यै। परकीयस्य गायत्री छंदसोभि
भवाय स्वाहुतमिदमस्तु। त्रिष्टुभ इत्यादिषु चतुर्षु पदेषूत्तरेच वारो मंत्रा अभिधीयते ते षु संवेशायोपवेशा

वेत्येतदनुषंजनीयं। प्रथममंत्रे त्वमभिभूत्येत्याहेत्येतदनुभाष्यते। मंत्राणां तात्पर्यं व्याचष्टे। छंदांसि वै
संवेशा उपवेशा उपवेशाश्छंदोभिरेवैषां छंदांसि वृंक्त इति। योयं संवेशोपवेशः। तावुभौ छंदो
विषयत्वाच्छंदांस्येव। तथासति स्वकीयैश्छंदोभिरितरेषां छंदांसि विनाशयति। अयमत्राशयः विशेषान्विध
त्ते। सजनीयं शस्त्रं विहव्यं शस्त्रमगस्त्यस्य कयाशुभीयं शस्त्रमेतावदत्राशास्ति यावदेतद्यावदेवत्ति
नदेषां वृंक्त इति। योजात एव प्रथमो मनस्वानिति सूक्ते सजनास इंद्र इत्येवं सजनशब्दस्य विद्यमानत्वात्तत्सू
क्तं सजनीयं। निष्केवल्यशस्त्रे इंद्रस्य नु वीर्याणीत्यस्य स्थाने सजनीयसूक्तं शंसनीयं। ममाग्ने वर्चो विह
वेष्वस्त्विति सूक्ते विहवशब्दसद्भावात्तद्विहव्यं तत्र महादेवस्य देवशस्त्रे आ नो भद्रा इत्यस्य स्थाने शंसनी
यं। कयाशुभा सवयस इत्येतत्सूक्तमगस्त्येन दृष्टत्वादगस्त्यस्य कयाशुभीयं। मरुत्वतीयशस्त्रे जनिष्ठा उ
ग्र इत्यस्य स्थाने शंसनीयं। यद्यप्येतत्तच्छस्त्रादौ शास्त्रानुरोधेनोक्तं सूक्तं जातं पठनीयं। एतदुक्तं सूक्तत्रयं मा १०
नदस्ति एतावदेव सारं। एतत्पाठेन तु परेषां यावत्सारमस्ति तत्सर्वं विनाशयति। अथ नेमित्तिकं स्तोत्रविशेषं वि
धत्ते। यदि प्रातः सवने कलशो दीर्येत वैष्णवीषु शिपिविष्टवतीषु स्तुवीरन् यद्वै यज्ञस्यातिरिच्यते विष्णुं तच्छिपि

विष्टमभ्यतिरिच्यते तद्विष्णुः शिपिविष्टोतिरिक्त एवातिरिक्तं दधात्यथो अतिरिक्तेनैवातिरिक्तमात्मावरुंध
त इति। यदि प्रातः सवनकाले द्रोणकलशो दीर्येत विदीर्णो भवेत्। तदानीं स्तोतारः साम गा विष्णुदेवताका
सु शिपिविष्टशब्दयुक्तासु ऋक्षु स्तुतिं कुर्युः। यज्ञस्य संबंधि यदंगमतिरिच्यते शास्त्रीयं कर्म पुरुषप्रवर्त्त
ते तदंगं शिपिविष्टगुणविशिष्टं विष्णुमभिलक्ष्यातिरिक्तं भवति। यज्ञाः शिपिरिति श्रुत्यंतराच्छिपिशब्दः पशु
वाची। तेषु स्वामित्वेन प्रविष्टः शिपिविष्टः। तच्चातिरिक्तमंगं शिपिविष्टो विष्णुरेव। तत्स्वामिकत्वात्ततो वैष्ण
वीषु स्तुतेः तस्यामतिरिक्तं स्वामिन्येव विष्णावतिरिक्तमंगं स्थापयति। अतिरिक्तातिरिक्तं स्वामिनैव विष्णुना अति
रिक्तमथवा शास्त्रमंगमात्मा शास्त्रीयं कृत्वा सत्रफलं लभते। अथ द्वितीयतृतीयसवनयोर्विशेषं विधत्ते।
यदि मध्यंदिने दीर्येत वषट्कारनिधनं साम कुर्युर्वषट्कारो वै यज्ञस्य प्रतिष्ठा प्रतिष्ठामेवैनद्गमयंति य
दि तृतीयसवन एतदेवेति। द्वितीयतृतीयसवनयोर्द्रोणकलशो विदीर्णश्चेत् वषट्कारनिधनं साम कुर्युः।
निधनं साम्नः पंचमो भागः वषट्शब्दो निधनं साम भक्ति विशेषो यस्य साम्नः तादृशं साम कुर्युः। वषट्का
रो हि हविः प्रदानसाधनत्वाद्यज्ञसमाप्तिस्थानीयः तद्युक्तं सामगानेनैनं प्रतिष्ठामेवैनं तत्स्तोत्रं गमयंति। अवेकल्प

Indira Gandhi National
Centre for the Arts

तव्पदिततायस्वनेकलशो ऽभिषेत तदाप्येत देवा। अत्र यत्साम। तस्य ॥ तद्देवा वषट्कुर्वन्निध
न समापयंति। यदित तायस्वनेकलशोऽभिषेत तदाप्येत देवा। अत्र यत्साम तस्य संयोगेन सत्त्रविषये मासस्य विशेषाभि
नमेवसामकुर्युः॥ ॥पंचमोनुवाकः॥ ॥पंचमेनुवाकेगवामयनस्य संयोगेन सत्त्रं विधीयते। तदेतद्विधत्ते। षडहैर्मासान्संपाद्याह
र्हितः। अयमर्थः। गवामयनस्य गुणविकाररूपं उत्सर्गोऽभिधीयते। तदेतद्विधत्ते। षडहैः पंचभिरावृत्तैः एकं मासमनुष्ठायानंत
रमुत्सृजंति षडहैर्हि आसां तत्संपद्यंतीति। येऽपि पूर्वं षडहास्तैः पंचभिरावृत्तैः एकं मासमनुष्ठायानंतरमुत्सृजंति। एवं मासे समाप्ते
ऽमासस्य प्रथमदिने कर्तव्यं ज्योतिराख्यमहरुत्सृजेयुः। महावृतं भिक्षुर्वै रोहनं षष्ठ्ये ऽच्छमासस्य मास्यो
नारमहरुत्सृष्टव्यं। यस्माल्लोकेऽपि पंचभिः षडहैस्त्रिंशद्दिनानि गणयित्वा सावनमासो यमिति निश्चिन्वं
तिपक्षांतरं विधत्ते। अर्धमासैर्मासान्संपाद्याहरुत्सृजेयुरर्धमासैर्हि मासांत्संपश्यंतीति। पूर्वस्मिन्प
क्षे प्रायणीयारंभणीयारहर्विक्रोधादो पर्यस्तत्पती यदिनेषडहस्यारंभः। तदारभ्य त्रिंशद्दिनात्मके ११
सावनमासे गते सति तदूर्ध्वमहरुत्सृष्टव्यं। इदानीं प्रायणीयदिनमारभ्य पंचदशदिनात्मकाभ्यामर्धाभ्या
मर्धमासाभ्यामेकोऽभिप्राय
मर्धमासाभ्यामेकं मासं संपाद्य तदनंतरभाव्यहरुत्सृष्टव्यं। लोकेऽपि द्वाभ्यामर्धमासाभ्यामेकोऽभिप्राय
तदूर्ध्वेऽर्धमासैरेव मासस्वरूपं निश्चिन्वंति। नदिदं पक्षद्वयं सावनमासाभिप्रायं। अथ चांद्रमासाभिप्रा

येण पक्षद्वयं। तत्रैकं पक्षमाह। अमावास्यया मासान्संपाद्याहरुत्सृजंत्यमावास्यया हि मासान्संपश्यं
तीति। चांद्रमासद्वित्रिंशः केचिदमावास्यया मासस्य समाप्तिं निश्चिन्वंति। अतोऽत्रापि तथैव मासस्य समाप्य शुक्ल
प्रतिपदियदहरनुष्ठेयं तत्परित्याज्यं। चांद्रमासमाश्रित्यैव पक्षांतरमाह। पौर्णमास्या मासान्संपाद्याहरुत्स
जंपौर्णमास्या हि मासान्संपश्यंतीति। शुक्लप्रतिपदमारभ्यामावास्यांतश्चांद्रो मासइत्यतीतः पक्षः। कृष्ण
प्रतिपदमारभ्य पौर्णमास्यंतद्वितीयः पक्षः। एतस्मिन्कृष्णप्रतिपदि यदहस्तानतदुत्सृष्टव्यं। एतमेव पक्षं प्रशं
सति। योऽनेकूर्म आसिंचति परासंसिंचतियः कूर्णादुदचति प्राणमस्मिंस्तद्धातीयत्पौर्णमास्या मासान्सं
पाद्याहरुत्सृजंति संवत्सरायैव तत्प्राणं दधातितदनुसत्रिणः प्राणंतीति। लोके हि यः कोऽपि पुरुषो घृत
क्षीरादिनापूर्णे पात्रे पुनरप्युपरित द्रव्यमासिंचति सभूमौ पातयित्वा द्रव्यं विनाशयति। यस्तुबुद्धि
मान्पूर्णात्पात्रादुदचति स्वल्पमुद्धरति सोऽस्मिन्पात्रे प्राणरूपं वायुं दधाति। सति ह्यवकाशे वायुः संच
रति। एवं सति यदि यजमानास्तत्पौर्णमास्या तं तं मासं पूरयित्वा कृष्णप्रतिपदिकर्तव्यमहरुत्सृजेयुः
तदानीं संवत्सरस्य रूपपुरुषार्थं प्राणवायुं तस्मिन्दिने स्थापयंति। तत्संवत्सरप्राणस्थापनमनुसत्रिणो यजमानाः

मानाअपि·अभ्यासविरोधाभावेनजीवंति।अथव्यतिरेकमुखेनैतमेवपक्षंप्रत्यासति।यदहर्नेत्स्यंतोभवेयुःपौर्ण
मास्याविति।तानद्वौविपत्तेस्संवत्सरोविपद्येतदार्त्तिमार्छेयुःपौर्णमास्यामासांसंपाद्याहरुत्सृजंतिसं
वत्सरायैवतदुदानंदधतितदनुसत्रिणउदनंतिनार्तिमार्छंतीति।उक्तन्यायेनाहन्यनुत्सृष्टेसत्युद
कश्रुर्णोद्यतिरिक्तंबध्यमानोपियथादृढीभावेननद्रवतिएवंसंवत्सरात्मकःक्रतुर्विनश्यतियजमानाअपि
मरणंप्राप्नुवंति।तस्यदृष्टांतार्थमहन्युत्सृष्टेसतितेनाप्युत्सर्गेणसंवत्सरस्तत्रस्यात्केनाप्यर्थप्राप्तेसंचारस्य
नाद्यमुदानंसंपादयंति।तत्संपादनमनुसत्रिणोप्युदनंतिउच्छ्वसंति।ततोनार्तिंगच्छंति।पुनःप्रकारांतरे
णैतमेवपक्षंप्रत्यासति।दर्शमासेवैदेवानांत्रुत्वापौर्णमास्यामासांसंपाद्याहरुत्सृजंतिदेवानामे
तद्यदहर्नयज्ञंप्रत्यवरोहंतीति।पौर्णमास्यामेवयस्मात्देवानांसंबंधीसोमोभिषुतोभवति।अतः
पौर्णमास्यांमासंसंपाद्यपश्चादहरुत्सर्गेसतिदेवानांसंबंधिनातेनपूर्वयोगेनसंयोजयितुमिमं
तंयजमानाःप्रत्यवरोहंति।यस्मिंदिनेकर्तव्यमहरुत्सृज्यतेतस्मिंदिनेकर्तव्यमन्यद्विधत्ते।विवाएतद्युत् १२
छिदंतियत्षडहसंततंसंततमथाहरुत्सृजंतिप्राजापत्यंपशुमालभंतेप्रजापतिःसर्वादेवतादेवताभिरे

वयज्ञंसंततन्वंतीति।षडहेरश्मिपूर्वपृष्ठ्यरूपैःस्तोत्रैर्येनवर्तमानंयज्ञमनुच्छेत्स्यन्तअहरुत्सृजेयुःएते
नयज्ञंविच्छिंदंसेवातत्सहितंतस्मात्प्राजापत्यंपशुमालभेरन्प्रजापतिश्चसकलासर्वदेवतात्मकःअतो
देवताभिरेवयज्ञंसंततंकुर्वंति।अथतत्रकर्तव्यांतरंविधत्ते।यंतिवाएतेसवनाद्येहरुत्सृजंतितुरीयंखलु
वाएतत्सवनंयत्सान्नाय्यंयत्सान्नाय्यंभवतितेनैवसवनान्नयंतीति।येयजमानाअहरुत्सृजंतितेसव
नादपगच्छंति।प्रातःसवनादेरनुष्ठानाभावात्।तत्रकउपायइति।तदुच्यते।यत्सान्नाय्यमस्तितस्मान्नः
सवनादित्यपक्रम्योव्यतिरिक्तंचतुर्थंसवनस्थानीयम्।अतःसान्नाय्येनानुष्ठितेसवनान्नापगच्छंति।तस्य
सान्नाय्यरूपस्यसोमवदुपाह्वानपूर्वकंभक्षणंविधत्ते।समुपहूयभक्षयंत्येतत्सोमपीथाह्येतर्हीति।उ
स्तेषेदिमुख्यसोमाभावादेतस्मिन्कालेयजमानाएतत्सोमपीथाःएतदेवसान्नाय्यरोषभक्षणंसोम
पीथःसोमपानंयेषांतेतादृशाःतस्मात्सोमवत्सरस्यपरमभिहृत्यभक्षयेयुः।पुनरपिकर्तव्यांतरंविध
त्ते।यथायतनंवाएतेषांसवनभाजोदेवतागच्छंतियेहरुत्सृजंत्यनुसवनंपुरोडाशान्निर्वपेत्यथा
यतनादेवसवनभाजोदेवताअवरुंधतइति।येयजमानाअहरुत्सृजंतिएतेषांसंबंधिन्यःसवनभा

Indira Gandhi National
Centre for the Arts

सं॰ भा॰ १ माध्यंदिने सवने द्वादशकपालं तृतीयसवने छंदांसि वा

१२ २ सवनत्रयं कपालं माध्यंदिने सवने द्वादशकपालं तृतीयसवने छंदांसि वा

भाजो देवताः सवनाभावान्निराशाः सत्यः स्वस्वस्थानं गच्छंति अतस्तन्मा भूदिति तत्तत्सवनस्थानेषु पुरो-
रोडाशान्निर्वपेयुः। तेन तत्तत्स्थानान्नीतास्ता देवताः प्राप्नुवंति। तेषु पुरोडाशेषु संविधीयते। अष्टाकपालत्वात् प्रातः पुरो-
डाशो ... पुनरपि कर्तव्यांतरं विधत्ते। वैश्वदेवं चरुं तृतीय-
सवने ... इति अष्टत्वादिसंख्यासाम्याद्गायत्र्यादिछंदःप्राप्तिः। पुनरपि कर्तव्यांतरं विधत्ते। वैश्वदेवं चरुं तृतीय-
रूपेण निर्वपति वैश्वदेवं वै तृतीयसवनं तेनैव तृतीयसवनान्न यंतीति। तृतीयसवनस्य वैश्वदेवत्वं अन्य-
त्र स्पष्टमाम्नातं। वसूनां प्रातःसवनं। रुद्राणां माध्यंदिनं सवनं। विश्वेषां देवानां तृतीयसवनमिति। अ-
तो वैश्वदेवचरुणा तृतीयसवनान्नापगच्छंति॥ ॥षष्ठोऽनुवाकः॥ ॥षष्ठेऽनुवाके ह्युत्सर्ग उक्तः। सप्तमे-
ऽत्र विविच्योऽभिधीयते। तत्र निर्णयाय कंचिद्विचारं दर्शयति। उत्सृज्यां [illegible] नोत्सृज्यां इमामावास्यायां ... इति
... इति। उत्सर्गपक्षे यज्ञविच्छेदः। अनुत्सर्गपक्षे श्वास निरोध इति दोषद्वयं मन-
सि निधाय ब्रह्मवादिनो विचारयंति। स्तुतिर्विचारार्था। तत्रापि सूत्रः प्राजापत्यपक्षादिविवेकिविच्छेदस्य
माधान्तु ... तमेव दिनविशेषं दर्शयति। १२
अमावास्यायां च पौर्णमास्यां चोत्सृज्यमित्याहुरेतद्धि यज्ञस्य ... इति। एतयोरमावास्यापौर्णमास्योर्य-

ज्ञवाहित्वं प्रसिद्धं। तथा चान्यत्र स्पष्टमाम्नायते। ते अब्रूतां वरं वृणावहा आवं देवानां भागधेये असावेति। अ-
तस्तयोस्तिथ्योर्यद्वहर्यदहः प्राप्तं तदुत्सृज्यमित्येषां निर्णयः। अथान्येषां पक्षमाह। तेत्वाव नोत्सृज्येद्द्वाकु-
र्येऽअवांतरं यज्ञं भेजाते इति। या पौर्णमासममावास्यं अवांतरं यज्ञं भेजाते। तस्माद्ब्रथेव नोत्सृज्यो। नकेवलं ते-
यमेवतिरूपं दर्श पूर्णमास कर्मैव निष्पादयतः किंतु यजनादिगतमवांतरं कर्मापि। तस्मात्तयोरुत्सर्गो न युक्त इति।
तर्हि कस्मिंदिने हरूत्सर्गो इत्याशंक्य तेषां वचनं दर्शयति। या प्रथमा व्यष्टका तस्यामुत्सृज्यमित्याहुरेष वै
मासो विचार इतीति। व्यष्टकात्वेन कृष्णा प्रतिपदुच्यते। राजसूय प्रकरणे व्युष्टि द्विरात्रे पौर्णमास्यां पूर्वमहर्न-
वति। व्यष्टकायामुत्तरमिति। तस्यां व्यष्टकायां यस्मात्सहस्तदुत्सृज्यं। एषदिनविशेषो विचारो विनाशो मासः
पौर्णमास्यामेव पूर्वमासस्य समाप्तत्वात्। अतो मासविच्छेदाभावादत्रयुक्त उत्सर्गः। तस्यामथ व्यष्टकायाः
प्रायच्छक्ष्णा प्रतिपदादित्वादुपपद्यते। कश्चिदुत्सर्गमेव वदति। नादिष्टमुत्सृजेयुरिति। विभुवान्नसहस्रतमि-
ति नाम सहस्र पुरःसरं विशेषाकारेण यदुक्तमेतत् दादिष्टं। तन्नोत्सृष्टव्यं। यत्तु षड्हादि ह्रस्वसामान्यतः ... हा-
तदेवोत्सृष्टव्यं। पक्षानुत्सर्गपक्षमेव वैमासमित्यादिना स्वीकरोति। योयमुत्सर्गः स एव विचारो मासो भवति।

Indira Gandhi National
Centre for the Arts

अहरुत्सर्गे सति मासस्य संहतेरभावान्मासस्य विशीर्णत्वं। इति शब्दो हेत्वर्थः। यस्मान्मासस्यैवैकल्यं प्राप्नोति।
तस्मादादिष्टेनाग्नेणोपदिष्टमहरेकमपि नोत्सृजेयुरिति पक्षान्तरस्वीकारः। अतएव सूत्रकारः पक्षद्वय
स्वीकारमुपन्यस्योत्सर्गपक्षेनुष्ठेयविशेषमुदाजहार। उत्सृष्टव्यां त्वेवोत्सृज्या इति सु क्षेय ग्रहानुत्सृजेयुः
प्रथमं पृष्ठ्यसंस्थाप्येत्यादिना। तमिमं विशेषं वक्तुमत्राप्युत्सर्गपाक्षिके पुनर्विवादमपि। यदादिष्टमुत्स
जेयुः पर्यादिनो पुनः पर्याप्लावेन मध्ये षडहस्य संपद्येत षडहैर्मासान्संपाद्य सप्तममहर्मासिं नुत्सृजेयु
रिति। यदि गास्मोपदिष्टस्याप्युत्सर्गापेक्षा तदानीमपि पादशो यादशमहर्ज्योतिरादिकं पुनः पुनः पर्यावर्तेत
मासेषु षडहस्य मध्ये संपद्यते तादृशमेकोत्सृजेत न तु प्रतिपदोक्तं विषुवदादिकमित्यध्याहरणीयं। तस्मादमि
पूर्वपक्षाख्यैः षडहैर्मासं स्वरपिलाप्रकाशदूर्ध्वमावीयत्सप्तममहस्तस्मिन्नहनि प्राप्तं ज्योतिर्यमुत्सृजे
त्वादृत्स्वमुत्सर्गविशादीत्स्यतत्रानुष्ठेयविशेषं विशादयति। तद्ग्नये वसुमते पुरोडाशमष्टाकपालं निर्वप १४
पुरैंद्रं दधीन्द्राय मरुत्वते पुरोडाशमेकादशकपालं वैश्वदेवं द्वादशकपालमिति। तत्तस्मिन्नुत्सर्गदिने चत्वारि
हवींषि निर्वपेयुः। तत्र प्रथमं हविः प्रशंसति। अग्नेर्वैवसुमतः प्रातः सवनं यदग्नये वसुमते पुरोडाशमष्टाक

पालं निर्वपंति देवतामेव तद्भागिनीं कुर्वंति सवनमष्टाभिरूपयंतीति। देवतां वसुमंतमग्निं कपालगताष्ट
त्वसंख्यया गायत्रीद्वारा सवनमाप्नोति। द्वितीयं हविः प्रशंसति। यदैंद्रं दधि भवतीन्द्रमेव तद्भागधेयाच्च्या
वयंतीति। अपरतृतीयं हविः प्रशंसति। इंद्रस्य वै मरुत्वतो माध्यंदिनं सवनं यदिंद्राय मरुत्वते पुरोडाश
मेकादशकपालं निर्वपंति देवतामेव तद्भागिनीं कुर्वंति सवनमेकादशभिरुपयंतीति। यथा वसुमानग्निः
प्रातः सवनस्य स्वामी तथा मरुत्वानिंद्रो माध्यंदिनस्य सवनस्य स्वामी। वसुमतोऽग्नेस्त्वाभिलंभ्रत्स्वंतर
द्व्याद्यगं तस्यात इत्युक्तं देवतास्त्रेधा व्याकृता अग्निः प्रातःसवनेः इंद्रो माध्यंदिनसवनेः विश्वेदेवास्तृ
तीयसवनमित्येका श्रुतिः। यद्वसूनां प्रातःसवनमित्यपरा श्रुतिः। यास्विंद्रो माध्यंदिनसवनस्य स्वामी तद्भम
रुत्वान्। इंद्र मरुत्व इह पाहि सोममिति। श्रुत्यंतरात्। तत्राग्नेर्यथा प्रथमेनु हविषा भागित्वं एवमिंद्रस्यापि
न हविषा भागित्वं कपालगतैकादशसंख्यया त्रिष्टुप्द्वारा सवनप्राप्तिः। अपरचतुर्थं हविः प्रशंसति। विश्वे
षां वै देवानामृभुमतां तृतीयसवनं यद्वैश्वदेवं द्वादशकपालं निर्वपंति देवता एव तद्भागिनीः कुर्वंति सवनं
द्वादशभिरुपयंतीति। विश्वेषां देवानां तृतीयसवनस्वामित्वं पुरोदाहृतं। ऋभुमत्त्वमप्यभूणां तृतीयस

Indira Gandhi National
Centre for the Arts

सं.सा.भा. ५
१५

रेन देवतादवगंतव्या। तच्च तृतीयसवनस्य भुमतो विभुमतद्रूप्यादिमंत्रादवगम्यते। ताश्च देवता अनेन हवि
षा भागिन्यः। कपालगतद्वादशसंख्यया जगतीद्वारा सवनप्राप्तिः। अथ पूर्वोनुवाकोक्तं प्राजापत्यप्रशं
सति। प्राजापत्यं पशुमालभंते यज्ञो वै प्रजापतिर्यज्ञस्यानुसर्गायेति। यतस्य प्रजापतिस्वरूपत्वात् तद्रूपलं
अननुसर्गोपरित्यागः। अस्मिन्वै व्यहनि प्राजापत्येन यज्ञोऽपरित्यक्तो भवति। अथ पूर्वस्मिन्नप्यहनि ब्रह्मसा
मदिधते। अभिवर्तैरेतैः षण्मासोऽग्निष्टोमसामं भवति ब्रह्मसवा अभिवर्त्तो ब्रह्मणो वतत्सु वर्गतौ क्रमभिवर्तं
यं तो यंति प्रतिकूलमिव हीतः सुवर्गो लोक इति। गवामयनविहितत्वादस्याप्यासर्गिणामयनस्य द्वेपक्षसी।
तत्रच प्रथमेन पक्षसा स्वर्गप्राप्तिः। द्वितीयेन पक्षसा पुनर्भूलोकप्राप्तिः। एवं व्यवस्थायां सत्यामितो भूलोकात्ति
र्गं स्वर्गं गच्छतां यजमानानामानुकूल्येन एवं पक्षसि षडपि मासान्नैरंतर्येण प्रतिदिनमभिवर्तस्यं ब्रह्मस
सामभवेत्। तथा सत्यभिवर्तसाम्नो ब्रह्मरूपत्वाद्ब्रह्मसामर्थ्येन स्वर्गाभिमुख्येन गच्छंतः स्वर्गं प्राप्नुवंति। अपो
नरस्मिन्नपक्षस्य प्रत्यब्रह्मसामविधता। इंद्र क्रतुं न आभर पिता पुत्रेभ्यो यथा। शिक्षाणो अस्मिन्पुरुहूत यामनि १५
जीवा ज्योतिरशीमहीत्यमुत आयताः षण्मासो ब्रह्मसामं भवत्ययं वै लोको ज्योतिः प्रजा ज्योतिरित्यनेन लो

कं पश्यंतो ऽभिवदंत आयंतीति। अमुतः स्वर्गलोकादायतां भूलोकं प्रत्यागच्छतां यजमानानामानुकूल्येनो त
रस्मिन्नपक्षसि षडपि मासान्नैरंतर्येण प्रतिदिनमिंद्रक्रतुं न इत्यस्यामृचि उत्पन्नं तद्ब्रह्मसाम भवेत्। तस्यां ऋ
चोयमर्थः। हे इंद्र नोऽस्मदर्थमिमं क्रतुमाहर। तत्र दृष्टांतः। यथा लोके पिता पुत्रेभ्यो भागमादाय प्रयच्छति तद्वत्। हे ह्
रुहूत इंद्र अस्मिन्ननुष्ठीयमाने यामनि क्रतुविशेषरूपे अस्मे शिक्षा हितोपदेशं कुरु। वयं त्वत्प्रसादाज्जीवा जी
वंतो ज्योतिः प्रकाशात्मकं अनुष्ठलोकं नवा नीमहि। प्राप्नुयामेति। अस्यामृचि ज्योतिःशब्देन भूलोकस्तत्रत्यप्रजाश्च
विवक्षिताः। तस्मात्स्यैतदीयसामप्रयोगेणेमं भूलोकं ज्योतिःशब्दरूपं ताः प्राप्नुयामेति वाचो वदंत आगच्छंति॥ ॥
इति पंचमप्रपाठके सप्तमोनुवाकः॥ ॥ उत्सर्गिणामयनं सप्तमे मीमांसा निर्णितं। तावता विकृतिं समाप्याथ प्रकृता स
वेषगवामयनेय महाव्रतमस्ति तस्मिन्ननेनानुवाकत्रयेण विशेषाः केचिदुच्यंते। तत्रास्मिन्नष्टमे साम विशे
षाः केचिदुच्यंते। प्रथमंतावत्कौत्साख्यं साम विधत्ते। देवानां वा अंतं जग्मुषामिंद्रियं वीर्यमपाक्रामत्कौत्सेनावा
रुंधत तत्कौत्सस्य कौत्सत्वं पल्लोहीने चात्वालस्यांते स्तुवंति यत्र स्थेयांतेनैतेंद्रियं वीर्यमवरुंधत इति। पुराकदा
चिद्देवानां सत्रसमाप्तिं प्राप्तवतामिंद्रियं तत्सामर्थ्यं चापक्रांतं। ततो देवाः कौत्साख्येन साम्ना पुनः प्राप्तवंतः। कु

Indira Gandhi National Centre for the Arts

दाष्ट्रस्य महतस्तस्याद्यन्तोऽस्मिन्तः कौ वा वादसाद्यान्तसाधनमाचष्टे। तस्मादपगतवीर्यस्याद्यन्तसाधनत्वादे
राध्यष्टम हदस्यस्याद्यन्तोऽस्मिन्तः कौ वाद आद्यन्तसाधनमाचष्टे तेन यत्तस्सामीप्यं प्राप्यैन्द्रियसाम
तस्य सामान्तः कौ वादृतिनामधेयं तेन कौ वास्येन साम्ना चात्वालसमीपे स्तुतिं कुर्युः। तेन यत्तस्सामीप्यं प्राप्यैन्द्रियसाम
वर्ग्यप्राप्नुवंति। अथ सत्रस्य स्वधिनामकं सामांतरं विधत्ते। सत्रस्याहवनीयस्यांते स्तुवंत्यग्निमेवोपद्रष्टारं कृत्वा
र्द्धिमुपयंतीति। यस्तत्रस्वधिनामकं साम तेनाहवनीयसमीपे स्तुतिं कुर्युः। तथा सत्यग्निमेव स्तोतः साक्षिणं कृत्वा सम
द्धिमुपयंतीति। प्रजापतेर्हृदयेन हविर्धाने स्तुवंति प्रेमाणमेवास्य गच्छंतीति। प्रजापतेर्हृदय
द्धिमेव प्राप्नुवंति। सामांतरं विधत्ते। प्रजापतेर्हृदयेन हविर्धाने स्तुवंति प्रेमाणमेवास्य गच्छंतीति। अ
मितिकस्य चित्साम्नो नामधेयं तेन हविर्धानस्यांतः स्तुतिं कुर्युः। तेन स्तोत्रेणास्य प्रजापतेः प्रीतिं गच्छंतीति। श्लोक
स्य सामद्वयं विधत्ते। श्लोकेन पुरस्तात् सदसः स्तुवंत्यनुश्लोकेन पश्चाद्यत्स्येति गत्वा श्लोकभाजो भवंतीति। श्लोक
अनुश्लोकशब्दौ सामविशेषनामनी। ताभ्यां सदसः पुरस्तात् पश्चाच्च स्तुतिं कुर्युः। तेन यजमानसमानप्राप्य कीर्तिभाजो भवंति।
नुश्लोकशब्दौ सामविशेषनामनी। ताभ्यां सदसउभयतः स्तुतिं कुर्युः। तेन यजमानेषु दधातीति। अस्य
तत्रानुक्तं किंचिद्विशेषं विधत्ते। नवभिरध्वर्युरुद्गायति नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधातीति। अस्य १८
साम्न आधारभूताभिस्तिसृभिरृग्भिर्नवसंख्याकाः। गानकर्ता चाध्वर्युर्नतूद्गाता। पुरुषशरीरे नव च्छिद्राणीति विने
प्राणानां नवसंख्याकत्वात् सर्वान्यजमानेषु स्थापयंति। तास्वेकं किंचिद्विशेषं विधत्ते। सर्वा ऐंद्र्यो भवंति प्राणे

ष्वेवेंद्रियं दधातीति। इंद्रो देवता यासां ता ऐंद्र्यः। तथाविधा एव नवसंख्याकाः सर्वा अपि कार्याः। तेन प्राणेषु साम
र्थ्यं स्थापयंति। तासु प्रतिहारभागं निषेधति। अप्रतिहृताभिरुद्गायति तस्मात्पुरुषः सर्वाण्यन्यान्यंगानि
गानि प्रत्यंचति शिर एव नेति। गीयमानस्य साम्नः पंचभागाः। हिंकारप्रस्तावोद्गीथप्रतिहारनिधनाख्याः
तेषु प्रतिहारभागं वर्जयित्वा तद्भागैस्ताभिरृग्भिर्गायेत्। यस्मादत्र प्रतिहारो वर्जितः तस्माल्लोकेऽपि
पुरुषः शिरोव्यतिरिक्तानि हस्तपादादीन्यंगानि प्रत्यंचति प्रत्याहृतानि संकुचितानि करोति। शिर एव केवलं
न संकुचितं न करोति। न हि हस्तवच्छिरो वक्रीकर्तुं शक्यते। तस्माच्छिरस्थानीयाध्वर्युगाने प्रति
हारो वर्जनीयः। अथ तस्य गानस्याभितस्तोमद्वयं विधत्ते। पंचदशान्यः स्तोमो भवति सप्तदशान्य इन्द्रिय
स्य वीर्यस्यावरुध्या अथो प्रैव तेन जायंत इति। पंचदशास्तोमकेन रथंतरसाम्नैके स्तोता
गायेयुः। ततः पंचदशानामैन्द्रेण सह बलवत्त्वादिन्द्रियप्राप्तिर्भवति। तथा सप्तदशास्तोमयुक्तेन बृहता गाये
युः। सप्तदशस्य प्रजापतेस्तुल्यत्वात्प्रजातिः। यथा दक्षिणो द्वौ पक्षौ एवं तत्र गानद्वयं द्रष्टव्यं। आत्मान्यत्रा
त्रापंचदशस्तोम्यः पंचस्तोमो भवति सप्तदशस्तोम्य इति। अथ स्तोमसामविशेषानृत्विक्षु विधत्ते। एवं वै ...

Indira Gandhi National
Centre for the Arts

सं·सा·भा·१
१७

द्विपदासु प्रतिष्ठित्या इति। एकविंशस्तोमविशेषः। भद्रशब्दः सामविशेषस्य नामधेयं। पादद्वयोपेतात्र चो द्वि ७
पदाः। तेन पादद्वित्वेन प्रतिष्ठा भवति। एतस्य भद्रसाम्नः समीपे पत्नीगानं विधत्ते। पत्नयस्तु गायंति मिथुनत्वा
य प्रजात्या इति। यजमानानां याः पत्न्यः ताः सर्वा भद्राख्यसाम्नः गानस्य समीपे स्वयमपि गायेयुः। उरुप्राणांप
त्नीनां च गानेन मिथुनं पत्न्याः प्रजोत्पत्तिर्भवति। अथ सामांतरं विधत्ते। प्रजापतिः प्रजा असृजत सोकामयता
सामहं राज्यं परीयामिति तासां राजनेनैव राज्यं पर्यैत्तद्राजनस्य राजनत्वं यद्राजनं भवति प्रजानामेव तद्य
जमाना राज्यं परियंतीति। राजनमिति सामविशेषस्य नामधेयं। राज्यसाधनत्वात्तस्य राजनत्वं। तत्साम प्र
योगेण यजमाना राज्यं प्राप्नुवंति। तत्रैव स्तोमविशेषं विधत्ते। पंचविंशो भवति प्रजापतेराप्त्या इति। प्र
जापतेः पंचविंशस्तोमस्य सादृश्यात्तत्प्राप्तिः। तस्मिन्नेव पंचविंशस्तोमे कंचिद्विशेषं विधत्ते। पंचभिस्ति
ष्ठंतः स्तुवंति देवलोकमेवाभिजयंति पंचभिरासीना मनुष्यलोकमेवाभिजयंति दश संपद्यंते दशाक्षरा विरा १७
डन्नं विराड्विराजैवान्नाद्यमवरुंधत इति। पंचविंशाख्यस्तोमे या आद्याः पंच स्तोत्रियास्ताः स्थि
तैः पठनीयाः। तास्वनंतरभाविन्यः पंचसंख्याकास्ता आसीनैर्गीतव्याः। तेन लोकद्वयप्राप्तिः। दशसंख्यया मां

विराड्द्वारान्नप्राप्तिः। आसीनगाने कंचिद्विशेषं विधत्ते। पंच धाविनिरुद्य स्तुवंति पंच दिशो दिक्ष्वेव प्रतिति
ष्ठंतीति। पंचभिः प्रकारैः स्थानविशेषेषूपविश्य स्तुवंति। ऊर्ध्वया सह दिशां पंचत्वात् दिक्षु प्रतिष्ठा। तत्रैवान्यं चि
शेषं विधत्ते। एकैकया स्तुतया समायंति दिग्भ्य एवान्नाद्यं संभरंतीति। पंचसु स्थानेषूपवेशनकाले कंचि
दुद्गाताऽग्र एव मनुप्रविशति। तदानीमितरे सर्वे एकतयास्तोत्रियया तमुद्गातारं समागत्योपविशति। एवं स्तुता
न्नेतुप्रथमं पदेवोद्गातर्युपविष्टसति तत्तदृचा स्तुते प्राणेव सर्वेप्युद्गातारमुपगच्छेयुः। न श्यसति सर्वाभ्यो दिग्भ्यो
न्नं संपादयंति। इतरेष्वागतेषूद्गातृत्वं विधत्ते। तानिरुद्गातोद्गायति दिग्भ्य एवान्नाद्यं संभृत्य तेनात्मन्दधते
तस्मादेकः प्राणः सर्वाण्यंगान्यवत्यथो यथा सुपर्ण उत्पतिष्यंछिर उत्तमं कुरुत एवमेव तद्यजमानाः प्रजाना
मुत्तमा भवंतीति। यां स्तोत्रियां पुरस्कृत्योद्गातारमागच्छेति तया सहोद्गाता गायेत्। तया सर्वाभ्यो दिग्भ्यः संपादित
मन्नं तेजो रूपं सर्वेपि स्वात्मन्येव स्थापयंति। यस्मादत्र सर्वेष्वृत्विक्षु एक एवोद्गाता गायति तस्माच्छरीरमध्ये
क एव प्राणः सर्वाण्यंगानि रक्षति। अपि च यथा कश्चित्सुपर्णविशेष आकाशमुत्पतिष्यन् स्वकीयं शिर ऊर्ध्वं कु
रुते एवमेवैतेनोद्गातृगानेन प्रजानां मध्ये यजमाना उत्तमा भवंति। अथ [illegible]णां विराजमाधारविशेषं विधत्ते।

Indira Gandhi National
Centre for the Arts

संसा ११ ५
१८

आसंदीमुद्गातारोहति साम्राज्यमेव गच्छति प्रेंखं होता नाकस्यैव पृष्ठं रोहति कूर्चावध्वर्युर्ब्रध्नस्यैव विष्ट
पं गच्छत्येतावंतो वै देवलोकास्तेष्वेव यथापूर्वं प्रतितिष्ठंत्यथो आक्रमणमेव तत्सेतुं यजमानाः कुर्वते सुवर्गस्य
लोकस्य समष्ट्या इति। आसंदी चतुर्भिः पादैः रूपेता खट्वाकारा उद्गाता तदारोहणेन सर्वे यजमानाः साम्राज्यं
देवाधिपत्यं गच्छंति। प्रेंखो दोला तामारोहति तेन सर्वेऽपि स्वर्गमारोहंति। कूर्चौ दर्भविकारौ आसने तावध्वर्युरारो
हति। तेन ब्रध्नस्यादित्यस्य विष्टपं स्थानं गच्छंति। साम्राज्यस्वर्गादित्यस्थानरूपा ये लोका एतावंत एवा ये द्योतो
देवलोकाः तेष्वनुक्रमेण प्रतितिष्ठंति। अपि च तेनारोहणेन स्वर्गसमुद्रस्याक्रमणसाधनं सेतुं यजमानाः कु
र्वते तत्स्वर्गप्राप्त्यै भवति। अत्र मीमांसा॥ ॥ दशमाध्यायस्य चतुर्थपादे चिंतितं॥ पत्नीनामुपगानं किमृत्वि
जांतरं किं वर्तयेत् समुच्चितं वा गानस्य शारीरत्वान्निवर्तनं स्वरादिव्यंजकं गानं गृह्यते द्विधीयते। वादित्रोप
चयः साम्यात्सान्निध्याच्च समुच्चयः। महाव्रते श्रूयते। पत्न्य उपगायंतीति। प्रकृतौ श्रूयते ऋत्विज उपगायंतीति। १८
तदेतदृत्विगुपगानं पत्न्युपगानेन निवर्त्यते। ननु प्रकृतावुद्गातारान्निगायमाने सत्यृत्विजो न्यूसामेऽत्रोपगायं
ति। इह तु पत्न्यो वादित्रं वादयंतीति भिन्नविषयत्वान्नास्ति निरासः। मैवं। गानस्यावश्यशारीरप्रसिद्धत्वात्तस्मा

२।५

दृत्विजो निवर्त्य पत्न्यः सामोपगायेयुरिति प्राप्ते ब्रूमः। गानत्वादस्य नाक्षरोच्चारणमात्रं। किंतु स्वराभिव्यंजने
तच्छारीरेण वादित्रेण वा सिध्यति। अत एव गानतत्त्वज्ञा आहुः दारवी गात्रवीणा च द्वे वीणे गानजातिष्विति। तच्च
गानं गृहस्थायेनापूर्वक्रियाविधानात्प्रकृतिलिंगं स्यात्। एवं तर्हि गानोपचयवाचिन उपशब्दस्यैव पद्येष्विति चेत्
न। वादित्रोपचयसंभवात्। आसीत्तत्र वादित्रनादः। दिक्षु दुंदुभयो नदंतीति श्रुतेः। पत्न्युपगाने च वादित्रनादः कांड
वीणाभिरुपगायंतीति श्रुतेः। अतः सादृश्यात्संनिधानाच्च तदुपचयोपयुक्तः। तस्मादनिवृत्तेर्गानयोः समुच्चयः। तत ५
अ०७ त्रैवान्यच्चिंतितं। दीर्घश्लोकादिनाम्नां दिनवाचस्तुतिलिंगतः। दीर्घसाम्नो विशेषभेदो वचि स्यान्नात्समुच्चयः। महाव्रते
श्रूयते। श्लोकेन पुरस्तात्सदसः स्तुवंत्यनुश्लोकेन पश्चादित्यादि। तत्र श्लोकानुश्लोकनामकैः सामभिः त्राह्नतान्यपृष्ठ। न्या
२ दिस्तोत्रगतानि रथंतरं नामदेव्यादिनामकानि सामानि बाध्यानि। कुतः। स्तुवत इति प्रकृतिलिंगदर्शनात्। प्रकृतावा
ज्यैः स्तुवते पृष्ठैः स्तुवत इति हि श्रूयते। नैतत्सारः। किमत्र स्तुतिमनूद्य देशसामगुणो विधीयते किं वा गुणद्वयविशिष्टा स्तु
तिः। नाद्यः वाक्यभेदापत्तेः। द्वितीये तु कार्यभेदेन बाधाभावात्समुच्चयः स्यात्। ॥ इत्यष्टमोऽनुवाकः॥ ॥ अष्टम
क्रौञ्चसामादीन्युक्तानि। नवमे शततंतुवीणादिकमुच्यते। तत्रादौ तावत्सामद्वयं विधत्ते। अर्ध्येन वै सहस्राणि प्रजाप

Indira Gandhi National
Centre for the Arts

सं० ला० भा०

१९

तिः प्रजा असृजत ताभ्य इलांदेनान्नतामवारुंध यदस्यं भवति प्रजा एव तद्यजमानाः सृजंत इलांदं भवति
प्रजाभ्य एव सृष्टाभ्य इलांदेनान्नतामवरुंधते तस्माद्यां समां सत्रं समृद्धं दीक्षो धुकास्तां समां प्रजा इषं घासा
मूर्जमावदने यां समां व्यृद्धं दीक्षो धुकास्तां समां प्रजा न घासा निषमर्जमाददत इति। अर्क्यमिति कस्य
चित्साम्नो नामधेयं। तेन प्रजापतिः पुरा बहुविधाः सहस्रसंख्याः प्रजा असृजत। इलांदमिति साम्नांतरस्य नामधे
यं। तेन साम्ना सृष्टप्रजार्थं भूतामिरां वृष्टिच्छिन्नमन्नं अवारुंध। पुनस्तपोविच्छेदेन संपादितवान्। तद्वद्यजमाना
अपि साम्नद्वयेन प्रजाः सृष्ट्वा तदर्थमन्नं संपादयंति। यस्मादस्मिन्नर्क्ये साम्नोऽन्नं संपाद्यते तस्माद्यां सत्रं सम
ृद्धं यस्मिन्संवत्सरे नैरंतर्येण सत्रं समृद्धमनुष्ठितं तां समां प्रजाः दीर्घकाः। तस्मिन्संवत्सरे नैरंतर्येण क्षुधिताः प्रजाः
क्षीणा समीपे सर्वदिग्भ्यः समागच्छंति सत्रिणो घासां प्रजानां नानाविधमन्नरसं च समादायच्छंति। यस्मिंस्तु संव
त्सरे सत्रं व्यृद्धमप्रवृत्तं तस्मिन्संवत्सरे अ[?]अदीर्घकाः क्षुधिताः कश्चिदपि नागच्छंति। यस्मादासां प्रजानां घा
सं क्षीरादिरसं च नैवादायागच्छंति तस्मादनागमनं। अथान्यदप्युपविधत्ते। उल्कोदं कुर्वंति यजमाना अनुतुष्टा १९
यजमानाः कोदं कुर्वंति। हर्षनिमित्तः
नादं कुर्वंत एवमेव तद्यजमानादेवं यथास्तु मुचाना उल्कोदं कुर्वंति हर्षनिमित्तः

घस्तु द्वध्वनिरुत्क्रोदः। सर्वे यजमानाः सत्रसमाप्त्यां संतुष्टा उत्क्रोदं कुर्युः। यथा लोके चिरं प्रवसंतः व
धाः पुरुषाः तद्दिनो वेगवंतो हर्षेणोत्क्रोदं कुर्वंति। एवमेव यजमाना अपि चिरकालानुष्ठेयसत्रस्य पादे वधा
द्दिनो वं प्राप्नुवंतः सत्रसमाप्त्यनंतरसंचरत्वात् निसंपादयंति। अतउत्क्रोदं कुर्वंति। यदुक्तं सूत्रकारेण।
औदुंबरस्य वीणादंडस्य दर्शातिमथितान्येकस्मिन्नतिमथिते दशा दर्भो जोः नामो दशातिमथिता स्ववयति सवाणः
शततंतुरिति। तदेतद्विधत्ते। वाणः शततंतुर्भवति शतायुः पुरुषः शतेंद्रिय आयुष्येवेंद्रिये प्रतितिष्ठती
ति। दशेंद्रियाणां दशसंख्याकानां नाडीषु वृत्तिभेदेन शतसंख्या। उत्साहे येतायजमानानां कांचिन्मर्यादां
कृत्वा तत्पर्यंतं धावनं विधत्ते। आजिं धावंत्यनभिजितस्याभिजित्या इति। यत्पूर्वमनभिजितं असंपादितं
फलं तस्य संपादनाय इदं धावनं। उत्साहद्योतकमन्यद्विधत्ते। दुंदुभीन्समाघ्नंति परमा वा एषा वाग्या दुंदु
भौ परमामेव वाचमवरुंधत इति। दिक्षु स्थापितान्दुंदुभयः तान्समाघ्नंति। सोयं दुंदुभिध्वनिः स
र्वध्वनीनामुत्तमः। असुस्त्वात्। तद्वादनेन समारंजनक्षमां परमां वाचं प्राप्नुवंति। यदुक्तं सूत्रकारेण अ
पंचगोमं उपभूमिदुंदुभिमवटं तं नेत्यधमितेषु धर्वं बहिर्वेदि तं मार्द्रेण चर्मणोत्तरलोम्नाभिवितत्य शंकु

निःपतिनिहत्या त्रैनत्सुत्तकांडमाहननार्थं निदधातीति। तत्र तेन पुत्तकांडेनाहननं विधत्ते। भूमिदुंदुभिमाघ्नंति
पितरः पार्थिवेषु
येवेमांवा कृत्रविष्टाता मे ग्रावरूं धते थोड् मामेव जयंति सर्वा वाचो वदंतीति। भूमिदुंदुभ्यापाते न पार्थिवेषु द
बन्धुपरस्परसंघट्टनेन जन्याः शब्दविशेषाः स्वाधीना भवंति। यदुक्तं सूत्रकारेण उपाघ्नते माइंद्रस्यस्तोत्रेस
वीणाः पिच्छोलादृतिपतल्ययो वादयंति संप्रवदि
र्वीवाचो वदंस्तु क्रोदययजमानाः कुर्वंति। पाद्याट लिकास्तु बुरू वीणाः पिच्छोलादृतिपत्न्यो वादयंति संप्रव
दंति वीणाः कारकानालीरूपाहिताद्दृति। तदेतद्विधत्ते। सर्वा वाचो वदंति सर्वासां वाचामवरुध्या इति। अघा घा
टलिकादिवाद्यविशेषजन्या मनुष्यगवाश्वादिशब्दजन्याश्च येन शब्दविशेषास्ते सर्वेपि प्राप्यतद्वंस्य र्भः
म्य यज्ञ ब्राह्मणे शूद्रयो श्चर्मनिमित्तं कलहं विधत्ते। आर्द्रं चर्मन्याय च्छेते इंद्रियस्यावरुध्या इति। तेनार्द्र चर्म
निमित्तेन कलहेन सामर्थ्यसंपत्तिर्भवति। कलह प्रकारस्तु सूत्रे विस्पष्टमुक्तः शूद्रार्यौ चर्मकर्तेव्याय च्छेते
आर्द्रं चैते परिमंडलं तं वेदिब्राह्मणो बहिर्वेदि शूद्रः आक्रोशति शूद्र इमं प्रवंसति ब्राह्मणः इमेरात्सुरिमं सुस्रत
मक्रान्त्रिति ब्राह्मण इमं उद्वासीकारिण इमे दुर्भूतमक्रन्निति शूद्रः स्तु ब्राह्मणः संजित्याग्नीध्रे चर्म ध्यस्यतीति। तेन
मक्रोंशति पुनात्येवेना नसा यः प्रत्रा
क्रोशं प्रदः साच क्रमेण विधत्ते। आन्यः क्रोशति प्रान्याः शंसति य आक्रोशति पुनात्येवेना नसा यः प्रशंसति २०

---

सति पूते ष्वेवान्नाद्यं दधातीति। इमे सत्रानुष्ठायिनो यजमाना द्रव्यव्ययं कृत्वा सर्वं श्रमस्याकारिणः अतो दुर्भि
पारनकुर्वन्निस्येवमन्य एकः शूद्र आक्रोशतीति निंदेत। इमे यजमानाः समृद्धिं गताः सत्यापारमकुर्वन्नित्येवमन्य
एको ब्राह्मणः प्रशंसेत्। तयोर्मध्ये यः शूद्र आक्रोशति स एनान्यजमानान्नुद्गोपयित्वा निष्पापान्करोति। यो ब्रा
ह्मणः प्रशंसति स पूतेषु यजमानेषु अन्नाद्यं संपादयति। अथ कांश्चित्सामविशेषान्विधत्ते। त्रापिष्ठतं च वा
तं देवकृतं च तद्वसिर्भीसे रवरुंधते यद्भूते छंदांसि सामानि भवंति तुभम सस्यावरुध्या इति। येन मंत्रेण सर्वमनुदेये
कात्तुपकारः तदुभयमत्रावर्तादृवामसत तदु पांत्यादङ्घि निरुपिं तैर्ना सर्वे जमाना प्राप्नु
वंति। अतो महाव्रते तदुभयसाम्यर्थं भूते छंदोनामकानां नाम्नां सानि धीनित्वेदि नि सामानि गातव्यानि। अ
यज्ञ ब्रह्मचारिपुंश्चल्यो मिथुनीभावं विधत्ते। यंति वा एते मिथुनाद्ये संवत्सरमुपयंत्यंतर्वेदि मिथुनौ संभव
तस्तेनैव मिथुनान्नयंतीति। ये यजमानाः संवत्सरसत्रमनुतिष्ठंति ते चिरकालं ब्रह्मचर्येणासान्मिथुनव्रता
इयगच्छंति। अतः पुनस्तेछ त्रिशाल्यर्थं वेदिमध्ये ब्रह्मचारिपुंश्चल्यौ मिथुनाय वा संगवं कुर्याताम्। तेन संप
वेस्य यजमाना मिथुना तेजस्पृछंति। अत एव देशाश्च सूत्रकारेण दर्शितः उत्तरस्यां वेदिश्रोण्यां पुंश्चल्यौ मा ग

सं॰स॰भा॰५
२१
धानं च परिश्रयंतीति। मगधदेशोत्पन्नो ब्रह्मचारी मागधः॥ ॥इति नवमोनुवाकः॥ ॥नवमेनुवाके ब्रह्मोद
दिकमुक्तं। अथ दशमे दासीनृत्यमुच्यते। चर्मावभिंदंति पाप्मानमेवैषामवभिंदंतीति। अत्र भेद्यं चर्म सूत्रका
रेण विस्पष्टमुक्तं। उत्तरे मार्जालीयस्य संघाते तेजनसंघाते वार्द्रं चर्म व्यधनाय वितत्य प्रयंतीति। वेधनप्र
कारश्चतेनैव स्पष्टमुक्तः। विपरीयांस्यतश्चर्म रुवन्ति नस्तेषामेकैकं संग्रास्ति मा वरात्सीर्मातिव्यात्सीरिति तत्ते
विद्वानातिपादयंतीति। ते न चर्म विध्यन्ते नैषां यजमानानां पाप्मानमेवावभिंदंति। अथ वेधनात्पूर्वं केवा विधय
यो नाम नं विधत्ते। मा वरात्सीर्मातिव्यात्सीरित्याह संप्रत्यैवैषां पाप्मानमवभिंदंतीति। हे कचित्र चर्म विध
नामग्र तस्य बाण स्मर त्वं जनस्य मपराधं मा कार्षीः। अस्य वत्नमपि चर्म मभिलापरतो बाण नमन तत्र नात्यन्त
वेधनं कार्षीः। अथैवं सत्येषां यजमानानां पाप्मानं सम्यगेवावभिंदंति। अथ नृत्तं विधत्ते। उदकुं
भं माकाषा रिरक्षेव मध्यमुपूर्य पात्। एवं सत्येषां यजमानानां पाप्मानं सम्यगेव भिंदंति। अनंतं मधु वेदेवानां परममन्नाद्य
मानाधिनिधावदास्यां मार्जालीयं परियंति न स्वंतिपदानि घ्नतीरिदं मधुं गायंत्यो मधु वै देवानां परममन्नाद्यं
परममेवान्नाद्यमवरुंधते पदानि घ्नंति महीयामेवैषु दधतीति। अत्र दासीसंख्यासूत्रकारो दर्शयति। मार्जा २१
लीयं तेष्टौ दासकुमार्य उदकुंभैर्निकल्पंत इति॥ तास्ता एतास्ता अष्टौ कुंभानादाय मार्जालीयस्याधि

[illegible]

यस्य परितो नृत्यंतिः नृत्तं कुर्वंति कीदृशो दास्यः पदानि घ्नतीः दक्षिणान्पादान्भूमौ ताडयंत्यः इदं मधिस्येतं मा
यस्य परितो नृत्यंति। मधु वै देवानां परमन्नं अनेन परमम
न्नं पश्यंतः अथवा इदं मेव सारं यं मधिस्यादि मंत्रं गायंत्यः। मधु वै देवानां परमन्नमनेन परमम
न्नं गायंत्यः अथवा इदमेव सारं यंम धिस्यादिमंत्रगायंत्यः। मधुवद्देवानां मत्स्यं तत्पिपमन्नं अन्नं नानेन परमम
त्वं पश्यंतः अथवा दृदमेव सारं यंमधि स्यादिमंत्रं गायंत्यः। मधुवद्देवानां मस्यं तत्सिपमन्नं अन्नमनेन परमम
न्नमेवैषु यजमानेषु महीयां संपादयंति॥ ॥इति दशमोनुवाकः॥ ॥दशमे दासीनृ
त्तमुक्तं। तावता महाव्रतं समाप्तं। अथोत्तरे षडनुवाके षष्ठमे धागमंत्रा उच्यंते। अत्रापि द्वयोरनुवाकयोर्नक्तहो
मंत्राः। तत्राद्ये प्रथमानुवाकगतान्मंत्रानाह। पृथिव्यै स्वाहांतरिक्षाय स्वाहा दिवे स्वाहा संप्लोष्यते स्वाहा संप्लवमा
नाय स्वाहा मेघायिष्यते स्वाहा मेघायते स्वाहा मेघिताय स्वाहा मेघाय स्वाहा नीहाराय स्वाहा निहाकायै स्वाहा प्रा
सचाय स्वाहा प्रचलाकायै स्वाहा विद्योतिष्यते स्वाहा विद्योतमानाय स्वाहा संविद्योतमानाय स्वाहा स्तनयिष्यते
स्वाहा स्तनयते स्वाहोग्रं स्तनयते स्वाहा वर्षिष्यते स्वाहा वर्षते स्वाहाभिवर्षते स्वाहा परिवर्षते स्वाहा संवर्षते स्वा
हानुवर्षते स्वाहा शीकायिष्यते स्वाहा शीकायते स्वाहा शीकिताय स्वाहा प्रोषिष्यते स्वाहा प्रुष्णते स्वाहा परिप्रु
ष्णते स्वाहोद्ग्रहीष्यते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा विप्लोष्यते स्वाहा विप्लवमानाय स्वाहा विप्लुताय स्वा
हातप्स्यते स्वाहातपते स्वाहोग्रमातपते स्वाहर्ग्भ्यः स्वाहा यजुर्भ्यः स्वाहा सामभ्यः स्वाहाङ्गिरोभ्यः स्वाहा वेदेभ्यः स्वा

हा गा धाम्यः स्वाहा नारानाः सीभ्यः स्वाहा रैभीभ्यः स्वाहा सर्वस्मै स्वाहेति। पृथिव्यादयस्त्रयो लोकाः। मेघो
त्पादनाय। धूमज्योतिः सलिलमरुतां संनिपातः संप्लवः। स च त्रिविधः। आगामी वर्तमानो भूतश्च। अभ्र त्रि
त्पादनाय। धूमज्योतिः सलिलमरुतां संनिपातः संप्लवः। एवमसर्वात्मकप्रजापतिसम्मितो ततद्रूपेण निर्दिश्यते। धूमादि संप्लवाद् ऊर्ध्वं भविष्यद् तेमानातीतदृश्या
एवमसर्वात्मकप्रजापत्यस्मि ज्ञात ततद्रूपेण निर्दिश्यते। धूमादिसंप्लवाद् ऊर्ध्वं भविष्यद् तेमानातीतदृश्या
प ज्ञामेघोत्पत्ति स्त्रिविधा। त्रिविध्य अनुगताकारो मेघः। मेघ निष्पत्ते ऊर्ध्वं द्रप्सपतनं नीहारः। द्रप्सानां बाहु
ल्येन ईषद् बंधकारा पादनं निहाका। तदीयत्वोत्यनाव पवसंकोचः सामचः। संकोचाद् ऊर्ध्वपलापत्वं प्रचलाका।
ततः ऊर्ध्वं भविष्यदादिरूपेण त्रिविधा विद्युत्। तथा गर्जनस्यापि व त्वात्रयो। दृष्टेः पितदृदवत्वात्रयांतत्रतती
मस्यामस्ता यां चत्वारो भेदाः। वा पुवव्रादाभिपुरोवेन दर्षणमभिवर्षणं। परितो मंडलाकारेण वर्षणं परिवर्षणं।
ऋजुधारात्वं संवर्षणं। गल्वुतः पुरुषस्य पृष्ठतो वर्षणमनुवर्षणं चेति। वृष्टिवृत्तस्य पुरुषस्य त्रिविधा शोस्याव
स्त्रावी कापनं। धर्मकाले तत्र छायांभूमौ प्रथम वृष्टेरवसाने समुत्थित ऊष्मा प्रोक्षः। सापि दृष्टा त्रयापनोदः
एरूपरम उद्गृहणं तदपि त्रिविधं। ततः ऊर्ध्वं मेघलेखाना नभस्यामनं विलुवः सोपि त्रिविधः। मेघलेशो बप्नोतेषु
सूर्यप्रकाशसंचार आतपः। सोपि त्रिविधः। पाद बद्धा मं त्रास चः। प्राश्लिष्ट प्रगीतानि पत्रं बि। मीस्वा स्म हाने

२७५ समवसरसतं भाष्यम।

६ ११ कामास्तुस्सरतो आसो अन्वेव जायंते प्रजया

तिरिक्तावा एताराश्र यक ऊनास्त यदेकस्मैन पंचाशाद तिरिक्तास्तं यष्ट्रयसी रष्टाचत्वारिंशात ऊनाश्च खलु
वा अतिरिक्ताश्च प्रजापतिः प्रजायतेति। अस्मिन्क्रतौ विद्यमाना एतारात्रयः ऊनाश्चातिरिक्ताश्च भवंति।
कथमिति। तदुच्यते। यद्यस्मात्कारणादेकोन पंचाशतऽ कयारात्र्या वर्जिता पंचाशत्संख्या। तस्मादेता ऊनाः
यद्यस्मात्कारणादष्टाचत्वारिंशत् संख्याया अधिकाः तस्मादतिरिक्ताः प्रजापतिः पुरा कश्चिदूनादल्पाद्वीर्या
सौ शरीर रसाः प्रजा असृजत। कश्चिदतिरिक्तादधिकादात्मदेरूजरोत्तरन्यूनात्वाद्वा दीर्न असृजत।
तस्माद्यूनातिरिक्तरूपो यं क्रतुः प्रशस्तः। एवं विधिवास्याभिहितं फलमुपसंहरति। येप्रजाकामाः पशुमिरिति।
ऊनुगतामहः संख्यां प्रशंसति। वैराजो वा एष यज्ञो यदेकस्मान्न पंचाशो य एवं विद्वाः अस एकस्मान्न पंचा
शमासते विराजमेव गच्छंत्यन्नादा भवंतीति। चतुर्थे हर्दशाकेपुदशासंख्यासद्भावान्मुख्यं वैराजत्वं पंचम
स्य दशाकस्यैकेनन्यूनत्वे पि वैराजत्वमुपचरितुं शक्यं। न वाएकेना क्षरेण छंदांसि वियंति न द्वाभ्यामिति के
ल्येतरात्य अतो वैराजत्वादन्नप्राप्तिः। प्रायणीयोदयनीयौ विधत्ते। अतिरात्राव भितो भवतोन्नाद्यस्य परि
गृहीत्या इति। उक्ताः न्यायेनाल्हेदुत्वाद न्नपरिग्रहः॥ ॥इति सप्तमोनुवाकः॥ ॥सप्तमेनुवाके एकोन

Indira Gandhi National
Centre for the Arts

पंचाग्न्याग्नेयो मिहितः। अथाष्टमादिषु चतुर्ष्वनुवाकेषु संवत्सरसत्रमभिधीयते। तत्राष्टमेनुवाके सं
वत्सरसत्रस्य दीक्षाकालं विधत्ते। संवत्सराय दीक्षिष्यमाणा एकाष्टकायां दीक्षेरन्नेषा वै संवत्सर
स्य पत्नी यदेकाष्टकैतस्यां वा एष एतां रात्रिं वसति साक्षादेव संवत्सरमारभ्य दीक्षंत इति। ये यजमा
नाः संवत्सरसत्रार्थं दीक्षिष्यंते ते यजमाना एकाष्टकायां माघकृष्णाष्टम्यां दीक्षां कुर्युः। ये यमेकाष्ट
काभिमानिनी देवता सेयं संवत्सराभिमानिनो देवस्य पत्नी। एकाष्टकाया अभिमानी देवता रूपत्वं गर्भ
धारणाद्वगम्यते। तथा चाग्निकांडे मंत्र आम्नायते। एकाष्टका तपसा तप्यमाना जजान गर्भं महिमान
मिंद्रमिति। संवत्सरस्य पतित्वं चान्यत्र मंत्रांतरेणाम्नातं। एकाष्टका तपसा तप्यमाना संवत्सरस्य पापत्नी
दुदुहे स्वपन्नीति। एव संवत्सराभिमानी देव एतां माघकृष्णाष्टमीं रात्रिं संवीयैतस्यामेकाष्टकादेवता या
मेव वसति। अतस्तत्र दीक्षां कुर्वतो यजमाना मुख्यमेव संवत्सरमारभ्य दीक्षितवंतो भवंति। तमेतं पक्षं 
दूषयित्वा पक्षांतरं विधत्ते। आर्त्तं वा एते संवत्सरस्याभिदीक्षंते य एकाष्टकायां दीक्षंते तन्नामानारतृभवतः फल्गुनीपूर्णमासे दीक्षेर
न्मुखं वा एतत्संवत्सरस्य यत्फल्गुनीपूर्णमासो मुखत एव संवत्सरमारभ्य दीक्षंत इति। ये यजमाना एका
ष्टकायां दीक्षंते ते यजमानाः संवत्सरसत्रस्यार्तिमभि विनाशमभिलक्ष्य दीक्षंते। तत्रायं हेतुः। पुरुमाघक्रू
ष्णाष्टकायां दीक्षंते ते यजमानाः संवत्सरसत्रस्यार्तिमभि विनाशमभिलक्ष्य दीक्षंते। तत्रायं हेतुः। पुरुमाघकृ
पावल्लर्यवो संवत्सरस्यांत इत्येतन्नाम धारिणौ। तयोः शिशिरर्तुरूपत्वात् तेन च तुनाशः संवत्सरस्य सम
 ततात् पौर्णमासी मारभ्य फाल्गुन पौर्णमास्याः प्राचीनः कालः संवत्सरस्यांतः। किं चैकाष्टकायां दीक्षमा
णाः संवत्सरस्य व्यस्तमभिविपर्यासमभिलक्ष्य दीक्षंते। आदौ हि दीक्षा कर्तव्या। अयं च संवत्सरस्यांतः का
लः ऋतवषड्योरेकयोऋतन्यायेनांतनामोपेतत्वात्। तस्मादुत्तरफल्गुनी युक्ते पूर्णमासे दीक्षां कुर्युः। त
स्य च भाविसंवत्सरोत्क्रमदित्वात्। एतदेवाभिप्रेत्याधानब्राह्मणे समाम्नातं। उत्तरयोरादधीत। एषा वै प्रथ
मा रात्रिः संवत्सरस्य यदुत्तरे फल्गुनीति। एतमपि पक्षं दूषयित्वा पक्षांतरं विधत्ते। तस्यैकैव निर्यायत्सा मे घे
विषूवान्संपद्यते चित्रापूर्णमासे दीक्षेरन्मुखं वा एतत्संवत्सरस्य यच्चित्रापूर्णमासो मुखत एव संवत्सरमार
भ्य दीक्षंते तस्य न कावन निर्या भवतीति। तस्य फल्गुनीपूर्णमासदीक्षापक्षस्यैकैव निर्या वक्ष्यमाणएकएवदो
षः। नतु पूर्वोक्तार्तत्व व्यस्तत्वे दोषौ। कोसावेको दोष इति स उच्यते। समा चीना अतिवर्षति क्षमा मे घाय स्मिन्रु

सं.स. ग्रा.४


र्षणक्षणमेषाम् [illegible] वर्षर्तौ सोयं संमेघः। तस्य संबंधी यस्मात्सन्नः कालः सांमेघ्यः। अस्मिन् काले विषुवानहः
संपद्यते। तथाहि। विषुवानिति संवत्सरस्य मध्यवर्तिमुख्योहर्विशेषः। ततः पूर्वे षण्मासाः। उत्तरे च षण्मासाः।
तयोरुभयोर्मासषट्कयोर्मध्ये सोहर्विशेषः कर्तव्यः। अत्र च फल्गुनीपूर्णमासमारभ्य द्वादशाहदीक्षा द्वादशो
पसदः आनुष्ठायोत्तरदिने प्रथममासोपक्रमः कार्यः। तथा सति चैत्रशुद्धनवम्यामुपक्रमो भवति। आश्वयु
जशुद्धाष्टम्यां मासषट्कसमाप्त्यनन्तरं विषुवान्कार्यः। स च वर्षर्तौ प्रत्यासन्नः। भाद्रपदपौर्णमास्यां वर्षर्तौ
म मातस्तस्यानंतरमासवर्तित्वात्। अतो वर्षर्तुसमीपे विषुवद्दिनसंपत्तिपरिहाराय चित्रानक्षत्रयुक्तायां पौर्णि
मास्यां दीक्षा कर्तव्या। सोपि संवत्सरस्य मध्यपातित्वात् संवत्सरस्य मुखमेव। अतो मुखत एवारंभः कृतो भवति।
[illegible] इति फा[illegible]केशुद्धनवम्यां विषुवान् संपद्यते। तच्च दिनं वर्षर्तौ दूरवर्ति। अतो वृष्टिबाधाया अभावाद्दिवसं
मे। [illegible]स्य तदितितस्य पक्षस्य न कोपि दोषोस्ति। अयमुक्तविशेषमवलोक्य पक्षान्तरं विधत्ते। चतुरहे
पुरस्तात्पौर्णमास्यै दीक्षेरंस्तेषामेकाष्टकायां क्रयः संपद्यते तेनैकाष्टकां न छंबट्कुर्वंतीति। माघपौर्णमास्याः १४
उरस्ताच्चतुरहे शुक्लैकादश्यां दीक्षेरन्। तथा सति माघकृष्णसप्तम्यां द्वादशदीक्षाणां समाप्तत्वात्तदनं

तरवर्तिन्यामेकाष्टकायां सोमक्रयः संपद्यते। तथा सत्येकाष्टकाया अप्युपयुक्तत्वात्संवत्सरपत्नीत्वेन
मुख्यामेतां छंबट्कुर्वंति। निष्प्रयोजनां न कुर्वंति। ततः संवत्सरपत्न्याः सत्कार एको गुणः। अथ गुणान्तरं द
र्शयति। तेषां पूर्वपक्षे सुत्या संपद्यते पूर्वपक्षं मासा अभिसंपद्यन्ते ते पूर्वपक्ष उत्तिष्ठंति तानुत्तिष्ठत ओ
षधयो वनस्पतयोनूत्तिष्ठंति तान्कल्याणी कीर्तिरनूत्तिष्ठत्यरात्सुरिमे यजमाना इति तदनु सर्वे रा
ध्नुवंतीति। तेषामेकाष्टकायां क्रयमनुतिष्ठतां यजमानानां तद्दिनमारभ्यानुष्ठीयमानारम्भस्यानुष्ठाप
[illegible] चैत्रशुद्धचतुर्थ्यां संपद्यते। तत उत्तरदिने क्रियमाणानां मासानां शुक्लपक्ष एवोपक्रान्ता भवति। त
[illegible] संवत्सरमासाः शुक्लपक्ष एवाभिलक्ष्य समाप्यन्ते। तेषु समाप्तेषु ते सत्त्रिणोपि पूर्वपक्ष एव सत्रादु
त्तिष्ठंति। उत्तिष्ठतस्तान्यजमानाननुभूम्यामोषधयो वनस्पतयश्च सत्कर्मानुष्ठानसामर्थ्यादुद्गच्छंति।
तदनु [illegible]तिता यजमानाननु पुण्यकीर्तिरुत्तिष्ठति। कीदृशी कीर्तिरिति सोच्यते। इमे यजमाना अरात्सुः
समृद्धिं गता इत्येतादृशी कीर्तिः। सत्कीर्त्युत्थानमनु सर्वे प्राणिनः समृद्धा भवंति। एतदीयेन सत्कर्मानुष्ठानेन भू
मौ सर्वस्याभिवर्धनात्। तस्मादाद्यगुणसंघमवेक्ष्य माघशुक्लैकादश्यां दीक्षेत्ययमेव मुख्यः पक्षः॥ अ

Indira Gandhi National
Centre for the Arts

१५

त्रमीमांसा॥ षष्ठाध्यायस्य पंचमपादे चिंतितं। गवामयनप्रकृतानुयाकाचित्पूर्णिमा धत्ता। चैत्री माघ्युतका ॐ·१०
चित्स्याद्विरोधात्तत्रांसया। चैत्री स्यात्क्रय एकाष्टकायामित्युपवर्णितं। माघकृष्णाष्टमी त्वेकाष्टका तो माघे
पूर्णिमा। गवामयने श्रूयते चतुरहे पुरस्तात्पौर्णमास्यै दीक्षेरं तेषामेकाष्टकायां क्रयः संपद्यत इति। पौ
र्णमास्याः पूर्वस्मिन् चतुरहे दीक्षेरन्नेकादश्यां दीक्षामारभेत। तथा सति पौर्णमास्या उपरितने सप्तमेदि
ने द्वादश दीक्षाः पूर्यंते। तदुपरितन्यामष्टम्यां सोमक्रय इत्यर्थः। तत्र विशेषस्यानुक्तत्वात्काचित्पूर्णि
मेत्येकः पक्षः। चित्रापूर्णमासे दीक्षेरन्मुखं वा एतत्संवत्सरस्य यच्चित्रापूर्णमास इति प्रशस्यमानतया चै
त्री पौर्णमासीति द्वितीयः पक्षः। फाल्गुनिकस्मात्प्रथमा माघस्याष्टम्या एकाष्टकात्वात्तत्र सोमक्रयसंपत्त
ये माघ्याः पौर्णमास्याः पूर्वस्यामेकादश्यां दीक्षारंभ इत्यर्थः॥ ॥इत्यष्टमोऽनुवाकः॥ ॥अष्टमे संवत्स
रसत्रस्य दीक्षाकाल उक्तः॥ अथ नवमे दीक्षा उपसदश्चोच्यंते। ता उभयीर्विधत्ते। सुवर्गं वा एते लोकं यंति १५
ये सत्रमुपयंत्यभींधत एव दीक्षाभिरात्मानं श्रपयंत उपसद्भिरिति। सत्रानुष्ठायिनः स्वर्गं गच्छंति
तस्य योग्यतायै स्वदीक्षाभिरात्मानं स्वदेहमभींधत एव सर्वतो ज्वलयंत्येव उपसद्भिः श्रपयंते।

स्वदेहं पचंति। तस्माद्दीक्षा उपसदश्चानुष्ठेया इति विधेयोऽर्थः। यदि द्वादशाहविकृतित्वेन प्राप्ताः त
थापि विकृतिलिंगत्वाय स्तुतये वा तदनुवादोक्तः। अथ विभज्य परितासां कुर्वन्नुतासामनुष्ठेयविधानाद्द
शत्वं प्रकटयति। द्वाभ्यां लोमावद्यंति द्वाभ्यां त्वचं द्वाभ्यामसृक् द्वाभ्यां मांसं द्वाभ्यामस्थि द्वाभ्यां मज्जान
मात्मदक्षिणं वै सत्रमात्मानमेव दक्षिणां नीत्वा सुवर्गं लोकं यंतीति। द्वाभ्यां दिनद्वयानुष्ठेयाभ्यां दीक्षाभ्या
मुपसद्भ्यां च लक्षणीयं लोम महविर्मिव द्यंति। अनंतरभाविनीभ्यां द्वाभ्यां त्वचमवद्यंति। एवं रक्तमांसास्थिम
ज्जासु योजनीयं। यदेतत्सत्रं तदेतदात्मदक्षिणं वै। स्वशरीरमेव तत्र दक्षिणा। न त्वन्या गवादिकापात्ति।
तस्मात्स्वशरीरमेव दक्षिणारूपेण नीत्वा स्वर्गं प्राप्नुवंति। यदुक्तं सूत्रकारेण सत्रे चेद्वपनकाले सशिखानि
वपंत इति तदेतद्विधत्ते। शिखामनु प्रवपंत ऋध्या अथो रघीयांसः सुवर्गं लोकमयामेति। शिखामनु ल
क्ष्य पश्चात्कृतं वपनं कुर्युः। तत्र मस्तकरूपाणां केशानामपगमात्समृद्धिर्भवति। अपि च केशभाररहितार
घीयांसो लघुतराः संतः स्वर्गं प्राप्नुयामेत्यनेनाभिप्रायेण सशिखं वपनं कुर्युः॥ ॥नवमोऽनुवाकः॥ ॥
नवमे दीक्षा उपसदश्चोक्ताः। अथ दशमे प्रायणीयाख्यं प्रथममहरुच्यते। तदेतद्विधत्ते। ऋ सवादिनो वद

Indira Gandhi National Centre for the Arts

१८ ... ... अग्निष्टोमं प्रथममुपयंत्यग्निष्टोमय
त्यतिरात्रः परमो यज्ञक्रतूनां कस्मात्तं प्रथममुपयंतीत्येतद्वा अग्निष्टोमं प्रथममुपयंत्यथ ... आसते
षोडशिनमथातिरात्रमनुष्ठर्वमेवेतद्यज्ञक्रतूननुपेत्य तानालभ्य परिगृह्य सोममेवेतत्पिबंत आसते
ज्योतिष्टोमं प्रथममुपयंति ज्योतिष्टोमो वै स्तोमानां मुखं मुखत एव स्तोमानां प्रयुञ्जत इति। योयमतिरा
त्राख्यः क्रतुः सोयं यज्ञक्रतूनां परमः सोमयागरूपाये क्रतवः तेषां मध्ये चरमः। अग्निष्टोम उक्थ्यः
षोडश्यतिरात्र इत्येतस्य तदीयक्रमत्वादग्निष्टोमस्य च प्राथम्यं प्रजननं ज्योतिरित्यनुवाके तस्मादु
ज्येष्ठयज्ञ इत्याम्नातं। एवं सत्यग्निष्टोमं परित्यज्य चरमभाविनमतिरात्रं कस्मात्कारणात्सत्रं प्रथ
ममनुतिष्ठंतीति ब्रह्मवादिनां प्रश्नः। तत्राभिज्ञा एवमुत्तरमाहुः। नात्राग्निष्टोमः परित्यक्तः अया
न्निष्टोमो ह्यस्य षोडश्यतिरात्राणामुत्तरोत्तरस्य गर्भभूतत्वात् द्वादशस्तोत्रमग्निष्टोमं ततोग्
अपुनस्तोत्रत्रयाधिक्येनोक्थ्यः संपद्यते। तमप्यंतर्भाव्य पुनरेकस्तोत्राधिक्येन षोडशी संपद्यते।
तत्र्यं तर्भाव्य पुनस्त्रयोदशस्तोत्राधिक्येनातिरात्रः संपद्यते। अतः सत्रिणोतिरात्रमनुतिष्ठंतीति य १८
तद्युक्तमेतदंतर्भाव्य पुनस्त्रयोदशस्तोत्राधिक्येनातिरात्रः संपद्यते। अतो ... षोडश्यतिरात्रादिदं तदनु
तदेतद्वै एतस्मिन्सोमानुष्ठानेग्निष्टोमं प्रथममनुतिष्ठति। अपो ...

दर्शमेव अनुक्रमेणोदयज्ञक्रतूननुपेत्यानुष्ठातुं निश्चित्य तानज्ञक्रतूननुपक्रम्य परितः स्वीकृत्य ततः सर्वत्र
सोममेव पिबंतः सत्रिण आसते। तस्मादग्निष्टोमपरित्यागाभावादतिरात्रमग्न्यं ज्योतिष्टोमं प्रथममनुति
ष्ठेयुः। स हि ज्योतिष्टोमो ज्योतिर्गौरायुरित्येतन्नामकानां स्तोमानां क्रतूनां मुखवत्सदृशः तस्मान्मुखत एवा
स्तेयस्तोमान्क्रतून्सत्रिणः प्रयुंजते। गोष्टोमायु... ज्योतिष्टोमस्य प्रकारांतरेण पुनः प्र
शंसा ... विराजमभिसंपद्यते द्वे चर्चावतिरिच्येते एकपा गौ इतिरिक्त एकपायुरुक्तः सुवर्गो वै लो
कस्ततितेस ... विराजमभिसंपद्यते ... ज्योतिष्टोमे स्तोत्रगतायेक ... विप्रुषः संतितेसंस्त
को ज्योतिरूर्ध्वविराङ्ग्रहसुवर्गमेवतेन लोकयंतीति। ज्योतिष्टोमे स्तोत्रगतायेकविंशोषाः संतितेसंस्त
ताः संतो विराजं दशसंख्यामेव प्राप्नुवंति। न तु न्यूनाः नाप्यधिकाः। इतरयोस्तु गोष्टोमायुष्टोमयोः द्वे
चावतिरिच्येते। दशसंख्यां न प्राप्नुतः। तत्कथमिति। तदुच्यते। एकपंचाशो गोष्टोमोदशसंख्यायाः अतिरिक्तः।
आयुष्टोमस्त्वेकपान्न्यूनः। तस्माद्विराड्रूपत्वं ज्योतिष्टोमस्य प्राशस्त्यहेतुः। किंच भास्वत्त्वाज्ज्योतिष्टोमः स्व
र्गलोकात्मकः विराड्रूपः। तस्मादनेन यथा तत्रास्ते न तेन ज्योतिष्टोमेन स्वर्गलोकं प्राप्नुवंति। अथास्मिन्नतिरात्रे
... ज्योतिष्टोमे साम विधि ... रथंतरं दिवा भवति रथंतरं नक्तमिति ... ब्रह्मवादिनः ... तदन्यामी

Indira Gandhi National
Centre for the Arts

तिसोमः तृतीयसवने क्रियमाणं बृहत्साम ध्यतो द्यति विघ्नस्येते नान्नामीति। दिवा ह वै बृहत् रथंत
रं गीयते। नक्तमपि रात्रिपर्यायेषु रथंतरं गीयते। तत्र दशमीमालस्यं भवति। आलस्यपरिहारः केनान्येन सा
म्ना भवतीति ब्रह्मवादिनां प्रश्नः। तत्राभिप्लवे तत्र माहुः। सोमः सर्वं यदन्यत्साम्ना क्रियते तृतीयसवने तत्र स
र्व सामैतेन गेयं। तच्च बृहत्सौ तदेतद्द्वयं रथंतरयोः समयोर्मध्ये स्तोत्र पचंति। तच्च यत्रास्य घ्नस्येसंपद्यते।
न तैर्विजातीयसाम्ना आलस्यपरिहारो भवति॥ ॥इति दशमोनुवाकः॥ ॥दशमेनाप्ययणीयमहरुक्तं। अ
थैकादशेनाससत्रामन्युच्यंते। तत्रादौ तावत्त्रीण्यहानि विधत्ते। ज्योतिष्टोमं प्रथममुपयंत्यस्मिन्नो
वते न लोके प्रतितिष्ठंति गोष्टोमं द्वितीयमुपयंत्यंतरिक्षएवैतेन प्रतितिष्ठत्यायुष्टोमं तृतीयमुपयंत्य
मुष्मिन्नेवैतेन लोके प्रतितिष्ठंतीयं तावज्ज्योतिरंतरिक्षं गौरसावायुर्यदेतान्स्तोमानुपयंत्येष्वेव तल्लो
केषु सत्रिणः प्रतितिष्ठंतो यंतीति। ज्योतिष्टोमगोष्टोमायुष्टोमा एकाह विशेषाः एते रेवानुलोमप्रतिलो
मगतैरभिप्लवः षडहः संपद्यते। तस्मिन् षडहे पूर्वभागवर्तिनोनुलोमगता एतेनुष्ठेयाः क्रमेणैतैर्लो
कत्रयेप्रतिष्ठा भवति। ज्योतिरादीनां भूरादिपदप्रत्वादेतैर्यागाणामनुष्ठानेन सत्रिणो लोकत्रये प्रतिष्ठिताः

सुष्ठेन व्यवहरंति। एवं ह्यस्मिन्ननुवाकेनयमदिनेनुष्ठेयः प्राप्यणीयाख्यो तिरात्ररूपो ज्योतिष्टोमो विहितः।
इहतु तृतीयदिनेनुष्ठेयो ग्निष्टोमात्मको ज्योतिष्टोम इति विशेषः। तस्यैतस्याग्निष्टोमरूपस्य ज्योतिष्टोमस्य
प्राथम्यं पूर्वोक्तातिरात्रवत् प्रशंसति। ते स्तुतस्ता विराजमभिसंपद्यते द्वेच वा अतिरिच्यते एकया गौरतिर
ए एकया पूरुः स्वर्गो वै लोको ज्योतिरूर्ग्विराडूर्जमेवावरुंधते तेन क्षुधा र्तिमार्छंत्यक्षोधुका भवंति क्षुत्संबा
धा इव हि सत्रिणः इति। ज्योतिष्टोमस्य स्तोत्रीयागतसंख्यया विराट् संपत्तौ विराजऊर्ग्रूपत्वात्ते सत्रिणः क्षु
धा संपादितामार्तिं न प्राप्नुवंति। किंत्वक्षोधुकाः सर्वदा क्षुद्रहिता भवंति। सत्रिणामनुष्ठानप्रयासबाहुल्या
त्तात्पर्येण तेषु क्षुत्संपादितबाधप्राप्तावपि एवं भवंति। तस्मात्तेषां क्षुत्परिहाराय ऊर्ग्रूपविराट्संपत्त्यात्मको ज्योतिष्टोम
एव प्रथममनुष्ठेयः। इदानीमुक्तैर्ज्योतिरादिभिरनुलोमप्रतिलोमगतैर्निष्पन्नमभिप्लवषडहं रथचक्ररूप
त्वेन स्तौति धत्ते। अग्निष्टोमाज्ञातितः प्रधाता वुक्तानाध्येनम्यंतत्तदेतत्परिवद्देवचक्रेण्पदेते न षडहेन यंति
देवचक्रमेव समारोहंत्यरिष्ट्यैते स्वस्ति समश्नुवत इति। लोके रथचक्रं फलकत्रयेण निष्पाद्यते। तत्र पार्श्वव
र्तिनी फलके प्रधाद्यवच्यते। मकोलीयते पार्श्वतिमध्यफलकमात्यमिति प्रधीमध्यफलकं तु नाम्यमित्युच्य

ते। नाभिस्थानीयत्वात्। एवं च सति तत्र चक्ररूपस्याभिप्लवषडहस्याभितो वर्त्तमानावाद्यंतदिनयोरनुष्ठे
यौ ज्योतिःशब्दाभिधेयौ याग्निष्टोमौ तावुभौ प्रधी। ये च मध्यवर्तिनो गोरायुः गौरित्येतन्नामानउ
क्थ्यरूपाश्चत्वारः क्रतवः ते सर्वे मिलिता मध्ये स्थितं नभ्यं तद्भवति। तदेतदभिप्लवषडहरूपं परिप्लवत् पुनः पुनः
प्रवर्तमानं देवचक्रमित्युच्यते। यस्मादेतेन देवचक्ररूपेण षडहेन यजमाना अनुष्ठानं निष्पादयेयुः तस्मात्ते
यजमाना देवचक्रमेव समारोहंति। तच्चारोहणमरिष्ट्यै हिंसाराहित्याय भवति। हिंसारहिताश्चैते स्वस्ति समश्नु
वते क्षेमं प्राप्नुवंति। पुनरपि षडहं प्रशंसति। षडहेन यंति षड्वा ऋतवः ऋतुष्वेव प्रतितिष्ठंतीति। तस्य षडह
स्यानुलोमप्रतिलोमरूपं प्रयाणक्रमं विधत्ते। त्र्यहं यतो ज्योतिषा यंत्यस्मिन्नेव यत एतस्मादु स्वर्गे लोकेऽप्रति
तिष्ठंतो यंतीति। ज्योतिर्गौरायुरित्येवमानुलोम्ये सत्यादौ ज्योतिः। आयुर्गौर्ज्योतिरित्येवं प्रातिलोम्ये
सत्यंते ज्योतिः। एवमुभयतो ज्योतिषा षडहेनानुष्ठाने सति स्वर्गप्रवेशकाले फलानुभवकाले च
प्रतितिष्ठंतोऽवृत्तारहिताः संतः संचरंति। तस्य च षडहस्य द्विरावृत्तिं विधत्ते। द्वौ षडहौ भवतस्तानि द्वाद
शाहानि संपद्यंते द्वादशो वै पुरुषो द्वे सक्थ्यौ द्वौ बाहू आत्मा च शिरश्च चत्वार्यंगानि स्तनौ द्वादशौ

तत्पुरुषमनुपर्यावर्तंत इति। सक्थिशब्देन श्रोणीद्वयमुच्यते। बाहुशब्देनांसद्वयं। आत्मा मध्यदेहः।
शिरः शीर्षं। हस्तौ पादौ च मिलित्वा चत्वार्यंगानि। ततो द्वौ स्तनौ द्वादशौ संख्यापूरकौ। तथा सत्येवं द्वादशा
हानि पुरुषमनुसृत्य पर्यावृत्तानि भवंति। तस्य च षडहस्य तृतीयामावृत्तिं विधत्ते। त्रयः षडहा भवंति ता
न्यष्टादशाहानि संपद्यंते नववान्यानि नवान्यानि नव वै पुरुषे प्राणाः तत्प्राणानन्वपर्यावर्तंत इति। सर्वा
न्यपि द्विरावृत्तान्यपि सहितानि। अष्टादशानामह्नां द्वेधा विभागे सति नवसंख्यया नव छिद्रगतप्राणा
ननुसृत्य षडहास्त्रयः पर्यावृत्ता भवंति। अपरं प्रशंसितुमभ्यासावृत्तिभिः सह चतुर्थीमावृत्तिं विधत्ते।
चत्वारः षडहा भवंति तानि चतुर्विंशतिरहानि संपद्यंते चतुर्विंशतिरर्धमासाः संवत्सरः तत्संव
त्सरमनुपर्यावर्तंत इति। संख्याद्वारेणार्धमासद्वारा संवत्सरमनुसृत्य चत्वारः षडहाः पर्यावृत्ता भ
वंति। अत्र मासस्वरूपापेक्षः षडहो व्याहर्तव्यः। अत एव छंदोगा आमनंति। यदेकैकः षडहो भ २
वति वीर्यवान् ततः प्रतितिष्ठंतीति। अत्राक्षेपसमाधानमुखेन षण्मासानुष्ठानं विधत्ते। अप्रतिष्ठितः
संवत्सर इति खलु वा आहुर्वर्षीयान् प्रतिष्ठाया इत्येतावद्वै संवत्सरस्य ब्राह्मणं यावन्मासो मासि मा

ऽवप्राप्तेति तिष्ठंतो यंतीति। दर्वेति न्यायेन मासः एकः प्रतिष्ठितो न संवत्सरः। तस्योक्तप्रतिष्ठाहेतो
र्मासाद्वर्षीयस्त्वात् तत्राधिक्यत्वादित्येवं केचिद्ब्रह्मवादिन आहुः। अत्रैतदुत्तरं। मासो ब्राह्म
णं सर्वोत्तरीत्या मासस्य प्रतिपादकं ब्राह्मणवाक्यं यावदस्ति एतावदेव संवत्सरस्य प्रतिपादकं ब्रा
ह्मणं। न ततोऽधिकं किंचिन्नूतनमस्ति। अनेनैव प्रकारेण प्रतिमासमनुतिष्ठंतो यजमानास्तस्मिं
त्रिंन्मासि प्रतितिष्ठंतः क्रमेण संवत्सरं यंति॥ १९ एकादशोऽनुवाकः॥ ॥ एकादशे संवत्सरगतेषु सर्व
मासेषु हानि विहितानि। अथ द्वादशेऽनुवाके सप्तमे धागमंत्रा उच्यंते। कल्पः। मेधस्यापचतेरवत्वि
ति पर्यग्न्योक्तिय माजेपाव्यानि तु होतीति। पाठस्तु। मेधस्यापचतेरवतु लोहितग्रीवश्छागैः शाल्म
लिर्वृद्ध्या पर्णो ब्रह्मणा प्लक्षो मेधेन न्यग्रोधश्चमसैरुदुंबर ऊर्जा गायत्री छंदोभिस्त्रिवृत्स्तोमैरि
ति। आविजातो मुख्यः पुमान् यो मेधास्ति सोऽयं पचतैर्हुतं दूनपचनीयैः द्रुमैर्विशेषैः सह हे अश्व त्वा १९
मवतु। एवमुत्तरेष्वपि मंत्रेषु त्वामवतिरनुषंजनीयं। अजजातो योऽयं मुख्योऽसौ लोहितग्रीवः सो
यमन्यैश्छागैः सह त्वामवतु। शाल्मलिरस्तु न्ननोद्दनविशेषः स्वस्वकीयपारध्या सह त्वामवतु। पर्णः